GOVERNMENT OF TAMILNADU

# संस्कृतमनोहरी

## SANSKRIT READER

## XI STD

“ सह नाववतु सह नौ भुनक्तु
सह वीर्यं करवावहै ”

**Untouchability is Inhuman and a Crime**

Department of School Education

XI Perface.indd 1 11/06/18 4:21 PM

**Government of Tamil Nadu**

First Edition - 2018

Reprint - 2019, 2020, 2021, 2022, 2023, 2024

**Content Creation**

State Council of Educational Research and Training

© SCERT 2018

**Printing & Publishing**

Tamil Nadu Textbook and Educational Services Corporation

www.textbooksonline.tn.nic.in



XI Perface.indd 2 11/06/18 4:21 PM

# आमुखम् - Preface

एकादशकक्ष्यायाः कृते प्रकल्पितमिदं पाठ्यपुस्तकं गद्यं, पद्यं व्याकरणमितिभागत्रययुक्तं भवति। एकैकस्मिन् विभागे शब्दकोशः, अर्थकोशः, अर्थज्ञानकौशलाभ्यासाः, भाषाज्ञानकौशलाभ्यासाः, कौशलवर्धनावृत्यभ्यासाः इति लक्ष्येषु विषयाः संकलिताः सन्ति।

अर्थज्ञानकौशलाभ्यासे प्रश्नाः पृष्टाः सन्ति। एते प्रश्नाः पाठविषयमभिप्रेत्य पृष्टाः। ततः परं भाषाज्ञानकौशलवर्धकाः प्रश्नाः सन्ति।

गद्यभागे स्थितानां पाठानां पदशब्दप्रयोगमधिकृत्य विषयाः स्थापिताः सन्ति । व्याकरणं च पाठाननुसृत्य अध्यापनीयमिति मत्वा तथा व्याकरणविषयाः निबद्धाः सन्ति यथा छात्राः सुलभेन पाठान् अवगच्छेयुः ।।



XI Perface.indd 3 11/06/18 4:21 PM

# देशीयगीतम्

जन गण मन अधिनायक जय हे
भारत भाग्य विधाता
पञ्जाब सिन्धु गुजरात मराठा
द्राविड उत्कल बङ्गा
विन्ध्य हिमाचल यमुना गङ्गा
उच्छल जलधि तरङ्गा
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा
जन गण मङ्गल दायक जय हे
भारत भाग्य विधाता
जय हे जय हे जय हे
जय जय जय जय हे !

महाकवि रवीन्द्रनाथ ठाकुरः

अस्पृश्यत्वम् अपचारः
अस्पृश्यत्वम् अपराधः
अस्पृश्यत्वम् अमानवधर्मः



XI Perface.indd 4 11/06/18 4:21 PM

## तमिऴ् ताय् वाऴ्त्तु - Tamil Thai Valzthu

नीरारुङ्कडलुडुत्त निलमडन्दैक्केलिलोलुगुं
सीरारुं वदनमेनत्तिकल्भरत खण्डमिदिल्
तेक्कणमुं अदिर्चिरन्त द्राविडनल् तिरुनाडुं
तक्कसिरुपिरैनुदलुं धरित्तनरुं तिलकमुमे
अत्तिलकवासनैपोल् अनैत्तुलगुं इन्बमुर
एत्तिशैयुं पुगऴमणक्क इरुन्दपेरुन्तमिलणङ्गे
तमिलणङ्गे
उन्सीरिळमैत्तिरं वियन्दु सेयल्मरन्दु वाऴ्त्तुदुमे
वाऴ्त्तुदुमे
वाऴ्त्तुदुमे !

- मनोन्मणीयं पे. सुन्दरं पिल्लै



XI Perface.indd 5 11/06/18 4:21 PM

## राष्ट्रिय प्रतिज्ञा

सर्वे वयं भारतदेशबालाः
स्वातन्त्र्यपीयूषसरोमरालाः ।
नीचोच्चजात्यादिविभेदशून्याः
सर्वे समानाश्च सहोदराश्च ।। ।।1।।

एको भावः सर्वसंक्षेपरूपः
एका भाषा भूतकारुण्यरूपा ।
एकं लक्ष्यं सामरस्यं समेषां
एकं तत्वं चित्तमानन्दपूर्णम् ।। ।।2।।

## प्रतिज्ञा - Pledge

भारतभूमिः मे माता। भारतीयाः सर्वे मम भ्रातरः भगिन्यश्च। भारतवर्षे मम मनः स्निह्यति। विविधे समृद्धे च भारतीये कलाचारे अहं गर्वमुद्वहामि। एतं योग्यं भवितुं सर्वदा यतेय। पितॄन् गुरून् वृद्धांश्चापि सर्वान् सादरं पूजयेयम्। सर्वस्मिन्नपि जने सादरं व्यवहरेयम्। मदीयाय देशाय देशीयेभ्यः मदीयेभ्यश्च मम प्रीतिं प्रतिजाने। तेषां योगक्षेमावेव मे आनन्दहेतुः, नान्यः।।



XI Perface.indd 6 11/06/18 4:21 PM

# SANSKRIT AND CULTURE GO TOGETHER

- Swami Vivekananda

**OBJECTIVES:-**

- To create interest in Sanskrit learning.
- To make the school going children to understand the precepts and practice of Indian culture and to inherit the leadership qualities.
- To enjoy the ancient classic with aesthetic experience.
- To prepare the students to speak, quote and compare Sanskrit with other languages.
- To morally and ethically enrich the attitude of students in order to make them as noble citizens of India.

Tamil and Sanskrit are friendly Classical languages of our motherland for so many centuries.

Both the languages have mutual affinity to each other. Hence the learning of Sanskrit language in Tamil Nadu would help the comparative studies in future.

Of course, Sanskrit learning along with Tamil (उभयप्रधान) mutually giving importance to each other was in vogue for many decades.

However, an attempt through this preparation of Textbooks has been made to enthuse the students not only to read Sanskrit in its original tongue but also to understand the merits of both the classical languages.

The listening and understanding the meaning of the word and sentences deeply reflecting the values and contents would be highly useful for the students of today.

The present preparation of the Sanskrit Textbooks for the Class 11 adopt the modern methodology by way of framing typical questions that would enhance the memory as well as the language speaking skills of the students.

Meticulous care has been taken to select portions suitable to the respective standards after comparing the contents of Sanskrit books prescribed in various standards in various states.

Apart from the course book and the workbook, study materials are given for additional reading to enrich the knowledge of the students.

The assessment and the examination pattern are in par with other languages taught in unified syllabus of Tamil Nadu.



XI Perface.indd 7 11/06/18 4:21 PM

“Sanskrit is like the river Ganga for our languages, If it were to dry up, the regional languages also would lose their vitaliry and power.”

**– Mahatma Gandhiji**

“The past has gone and the present is with us and we work for thefuture, But I have no doubt that whatever shape that future may take, one of the biggest, the strongest and the most powerful and the most valued, of our legacies will be the Sanskrit language.”

**– Pandit Jawaharlal Nehru**

“Sanskrit is the most suitable language that could be made the official language.”

**– Dr. Ambedkar**

“I often wonder which is the most important of the many things that have distinguished India in the past, in its history of years. I have no doubt at all in my mind that it is the Sanskrit language. It is that which has embodied the genius and wisdom of our race. Almost everything that has come out in later years can somehow be found to have sprung from this ancient language only.”

**- Dr. S. Radhakrishnan**



XI Perface.indd 8 11/06/18 4:21 PM

## मङ्गलाचरणम्

## ऐक्यमन्त्रः

यं वैदिका मन्त्रदृशः पुराणाः
इन्द्रं यमं मातरिश्वानमाहुः ।
वेदान्तिनोऽनिर्वचनीयमेकं
यं ब्रह्मशब्देन विनिर्दिशन्ति ।। ।।1।।
शैवा यमीशं शिव इत्यवोचन्
यं वैष्णवा विष्णुरिति स्तुवन्ति ।
बुद्धस्तथार्हन्निति बौद्धजैनाः
सच्छ्री अकालेति च सिक्कसन्तः।। ।।2।।
शास्तेति केचित् कतिचित् कुमारः
स्वामीति मातेति पितेति भक्त्या
यं प्रार्थयन्ते जगदीशितारं
स एक एव प्रभुरद्वितीयः ।। ।।3।।



XI Perface.indd 9 11/06/18 4:21 PM

# विषयसूची – (INDEX)


| भागः (Unit) | विषयः (Topic) | पृष्ठसंख्या (Page No.) |
|---|---|---|
| 1. पद्यम् | द्रविडसुधा | 1 |
| गद्यम् | महाभक्तः कण्णप्पः | 8 |
| व्याकरण-अभ्यासः | अजन्तपुल्लिङ्गशब्दाः,<br>धातुः-परस्मैपदी-लट् | |
| अनुच्छेदः | अनुच्छेदलेखनम् - 1 | |
| अनुवादः | अनुवादः – 1 | |
| 2. पद्यम् | पम्पावर्णनम् | 17 |
| नाटकम् | प्रतिमागृहम् | 23 |
| व्याकरण-अभ्यासः | अजन्तस्त्रीलिङ्गशब्दाः,<br>धातुः-परस्मैपदी-लङ् | |
| अनुच्छेदः | अनुच्छेदलेखनम् - 2 | |
| अनुवादः | अनुवादः – 2 | |
| 3. पद्यम् | यक्षप्रश्नः | 33 |
| कथा | धीरश्चोरः | 38 |
| व्याकरण-अभ्यासः | अजन्तनपुंसकलिङ्गशब्दाः | |
| अनुच्छेदः | अनुच्छेदलेखनम् - 3 | |
| अनुवादः | अनुवादः – 3 | |
| 4. पद्यम् | जीवेम शरदः शतम् | 45 |
| गद्यम् | हिमालयवर्णनम् | 52 |
| व्याकरण-अभ्यासः | धातुः-परस्मैपदी-लृट् | |
| अनुच्छेदः | अनुच्छेदलेखनम् - 4 | |
| अनुवादः | अनुवादः – 4 | |




XI Perface.indd 10 11/06/18 4:21 PM

| भागः (Unit) | विषयः (Topic) | पृष्ठसंख्या (Page No.) |
|---|---|---|
| 5. पद्यम् | सूक्तिसुधा | 60 |
| गद्यम् | सङ्घकालीनसंस्कृतम् | 66 |
| व्याकरण-अभ्यासः | धातुः-आत्मनेपदी-लट् | |
| अनुच्छेदः | अनुच्छेदलेखनम् - 5 | |
| अनुवादः | अनुवादः – 5 | |
| 6. पद्यम् | राजधर्मः | 73 |
| गद्यम् | विश्वशान्तिः | 79 |
| व्याकरण-अभ्यासः | धातुः-आत्मनेपदी-लङ् | |
| अनुच्छेदः | अनुच्छेदलेखनम् - 6 | |
| अनुवादः | अनुवादः – 6 | |
| 7. पद्यम् | विडम्बनकविताः | 86 |
| कथा | वरत्रयम् | 92 |
| व्याकरण-अभ्यासः | धातुः-आत्मनेपदी-लृट् | |
| अनुच्छेदः | अनुच्छेदलेखनम् - 7 | |
| अनुवादः | अनुवादः – 7 | |
| भाषासेतुः | संस्कृतपरिचयकरणम् | |




XI Perface.indd 11 11/06/18 4:21 PM

XI Perface.indd 12 11/06/18 4:21 PM

## प्रथमः पाठः 1

## Lesson – 1

# द्रविडसुधा

द्रविडसुधा इति नाम अयं पद्यांशः श्री. S.N. श्रीरामदेशिकमहोदयेन कृतात् संस्कृतानुवादात् स्वीकृतः। अस्मिन् पाठे तिरुवल्लुवर्, अव्वैयार्, सुब्रह्मण्यभारतीनां महाकवीनां तमिल्ग्रन्थानां संस्कृतानुवादश्लोकाः उपस्थापिताः विद्यन्ते ।

देशीयगीतानि इति तमिल्भाषायां विद्यमानः ग्रन्थः भारती नाम महाकविना लिखितः। अस्मिन् पाठे कविः हिमालयं समारभ्य इन्दुसरोवरपर्यन्तं परिवेष्ठितस्य भारतदेशस्य महत्वं सुष्ठु वर्णयति।

| | | |
|---|---|---|
| नाम | - | सुब्रह्मण्य-भारती |
| जननम् | - | डिसम्बर् 11, 1882 |
| जन्म स्थानं | - | एट्टयपुरम्, तिरुनेल्वेलीमण्डलम्, तमिल्नाडु, भारतम् |
| वासः | - | तिरुवल्लिकेणी, चेन्नै |
| अन्यनामानि | - | भारतीयार्, सुब्बय्या, शक्तिदासः |



अस्मद्देशः -

हिमाद्रितुल्यो भुवि नास्ति शैलः
गङ्गासमा श्रेष्ठनदी क्व चास्ति ।
ग्रन्थो न लोके किल वेदतुल्यः
न भारतात् श्रेष्ठतमोऽस्ति देशः।। 1

மன்னும் இமயமலையெங்கள் மலையே
மாநில மீதிதுபோர் பிறிதிலையே
இன்னறு நீர்க்கங்கை யாறெங்கள் யாறே
இங்கிதன் மாண்பிற்கெதிரது வேறே






Unit 1.indd 1 06-06-2018 12:35:58

பன்னரும் உபநிடத நூலெங்கள் நூலே
பார்மிசையேதொரு நூலிது போலே
பொன்னொளிர் பாரத நாடெங்கள் நாடே
போற்றுவம் இஃதை எமக்கிலை ஈடே

महारथैः योगिवरैरुपेतः
सन्मार्गगो नारदगानयुक्तः ।
ज्ञानाश्रयो बुद्धकृपैकपात्रः
लोकेऽद्वितीयो भुवि भारतोऽयम् ।। 2

மாரதவீரர் மலிந்த நன்னாடு
மாமுனிவோர் பலர் வாழ்ந்த பொன்னாடு
நாரத கான நலந்திகழ் நாடு
நல்லன யாவையும் நாடுறு நாடு
பூரண ஞானம் பொலிந்த நன்னாடு
புத்தர் பிரானருள் பொங்கிய நாடு
பாரத நாடு பழம்பெரும் நாடே
பாடுவம் இஃதை எமக்கிலை ஈடே

अव्वैयार् नाम महिला पण्डितशिरोमणिः द्विसहस्रवर्षेभ्यः प्राक्जीविता। अस्याः भागं तमिल्भाषायां अतिमुख्यतमं स्थानं विद्यते। अस्याः रचना 1. मूदुरै, 2. नल्वलि, 3. आत्तिचूडि 4. कौन्ड्रैवेन्दन्, 5. विनायकरगवल् च इति। अत्र मूदुरैतः एकः श्लोकः पाठ्यरूपेण प्रदत्तः विद्यते।



बन्धुः -

शुष्कात्तटाकाद्गतपक्षिवद्ये
त्यजन्ति दुःखे न हि बान्धवास्ते ।
शुष्के सरस्युत्पलवल्लिकावत्
खेदेऽपि सन्तः सह बान्धवाः स्युः ।। 3



Unit 1.indd 2 06-06-2018 12:35:58

அற்ற குளத்தின் அறுநீர்ப் பறவை போல்

உற்றுழித் தீர்வார் உறவு அல்லர் - அக்குளத்தில்

கொட்டியும் ஆம்பலும் நெய்தலும் போலவே

ஒட்டி உறுவார் உறவு.

तिरुक्कुरल् इति तमिल्भाषायां विद्यमानः ग्रन्थः तिरुवल्लुवर् महोदयेन लिखितः । अयं ग्रन्थः तमिल्ग्रन्थेषु उत्तमः विद्यते। ग्रन्थेऽस्मिन् धर्म-अर्थ-काम इति विभागत्रयं वर्तते । तत्र जीवने शिक्षायाः, कर्तव्यस्य, परिश्रमस्य, शुद्धाचरणादीनां च महत्वं वर्णितम् अस्ति ।



## कार्यसाधकोपायः வினைசெயல்வகை -

द्रव्यकालक्रियाहेतुस्थलानामनुकूलताम् ।

पञ्चानामपि विस्पष्टं बुद्ध्वा कार्यं विधीयताम् ।। 4

பொருள் கருவி காலம் வினையிடனொடு ஐந்தும்

இருள்தீர எண்ணிச் செயல்.

## उत्तमदेशः நாடு -

संपन्नीरोगताधान्यसमृद्धिः सुखजीवनम् ।

दुर्गश्च पञ्च देशस्य मण्डनानि भवन्ति हि । 5

பிணியின்மை செல்வம் விளைவின்பம் ஏமம்

அணியென்ப நாட்டிற்கிவ் வைந்து

## औषधम् மருந்து -

रोगतत्वं परामृश्य ज्ञात्वा रोगस्य कारणम् ।

शमनोपायमालोच्य वैद्यः कुर्यान्निवारणम् ।। 6



Unit 1.indd 3 06-06-2018 12:35:58

நோய்நாடி நோய்முதல் நாடி அதுதணிக்கும்

வாய்நாடி வாய்ப்பச் செயல்

## परोपकारः செய்நன்றி அறிதல் -

समये रचितं साह्यं स्वल्पं स्यात् परिमाणतः ।

तदेव कालभेदेन महत् स्यात् भुवनादपि ।। 7

காலத்தினாற் செய்த நன்றி சிறிதெனினும்

ஞாலத்தின் மாணப் பெரிது

## क्षमा பொறையுடைமை -

अपकारः परकृतः सोढव्यः सर्वदा नरैः ।

विस्मर्ता त्वपकाराणां ततो भुवि महीयते ।। 5

பொறுத்தல் இறப்பினை என்றும் அதனை

மறத்தல் அதனினும் நன்று.



**कविपरिचयः** - श्रीरामदेशिकः 1921 तमे वर्षे जून् मासे 21 तमे दिनाङ्के काञ्चीनगरे जन्म प्राप्तवान् । अयं पण्डितः संस्कृततमिल्भाषयोः निपुणः। संस्कृतभाषातः तमिल्भाषायां अनुवादः बहुभिः पण्डितैः कृतः। परन्तु तमिल्भाषातः संस्कृतभाषायां अनुवादः विरलाः एव जनाः अकुर्वन्। एतेन पण्डितेन तिरुक्कुरल् शिलप्पधिकारमित्यादि तमिल्ग्रन्थाः संस्कृतभाषायाम् अनूदिताः। अयं पण्डितः बहुभिः पुरस्कारैः अलङ्कृतः।।



Unit 1.indd 4 06-06-2018 12:35:58

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. अद्रिः – mountain
2. तुल्यः – similar
3. ग्रन्थः – book
4. श्रेष्ठः – best
5. योगिवरः – best ascetic
6. सन्मार्गः – righteous path
7. ज्ञानम् – knowledge
8. पात्रम् – character
9. कृपा – mercy
10. भुवि – in the earth
11. बन्धुः– relative
12. तटाकम् – pond
13. शुष्कम् – dry
14. सरः – lake
15. वल्लिका– creeper
16. खेदम् – grief
17. दुर्गः – fort
18. वैद्यः– physician
19. क्षमा– patience
20. साह्यम् – helpful
21. समृद्धिः– prosperity
22. भुवनम् – universe

### II. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. तुल्यः × अतुल्यः
2. ज्ञानम् × अज्ञानम्
3. अनुकूलः × प्रतिकूलः
4. कार्यम् × अकार्यम्
5. जीवनम् × मरणम्
6. सुखम् × दुःखम्
7. रोगः × अरोगः
8. स्वल्पम् × महत्
9. भेदः × अभेदः
10. क्षमा × क्रोधः
11. द्रोहः × अद्रोहः
12. धर्मः × अधर्मः

### III. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. अस्ति – लट् – प्रथमपुरुषः, एकवचनम् of अस् to be
2. ज्ञात्वा – त्वान्तम् अव्ययम् of ज्ञा to know
3. बुद्ध्वा – त्वान्तम् अव्ययम् of बुद्ध् to know
4. परामृश्य – ल्यबन्तम् अव्ययम् of मृश् with परा to search
5. अपि – indeclinable, meaning also



Unit 1.indd 5 06-06-2018 12:35:58

6. क्व – indeclinable, meaning where.

7. सह – indeclinable, meaning with

8. स्युः – विधिलिङ् – प्रथमपुरुषः, बहुवचनम् of अस् to be

9. भवन्ति – लट् - प्रथमपुरुषः, बहुवचनम् of भू(भव्) to be

10. हि – indeclinable, meaning indeed.

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. न + अस्ति = नास्ति
2. भुवनात् + अपि = भुवनादपि
3. भारतः + अयम् = भारतोऽयम्
4. बान्धवाः + ते = बान्धवास्ते
5. खेदे + अपि = खेदेऽपि
6. दुर्गः + च = दुर्गश्च
7. तदा + इव = तदेव
8. पञ्चानाम् + अपि = पञ्चानामपि
9. कुर्यात् + निवारणम् = कुर्यान्निवारणम्
10. तटाकात् + तव = तटाकात्तव

## V. अधोलिखितानां पदानां विग्रहं लिखत-

1. हिमाद्रिः – ____________
2. श्रेष्ठनदी – ____________
3. गङ्गासमा – ____________
4. वेदतुल्यः – ____________
5. सन्मार्गः – ____________
6. अद्वितीयः – ____________
7. अरोगता – ____________
8. परकृतः – ____________
9. धान्यसमृद्धिः – ____________
10. कालभेदेन – ____________

## VI. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. अद्रिः – शैलः, पर्वतः
2. तुल्यः – समः
3. ग्रन्थः – पुस्तकम्
4. देशः – राष्ट्रम्
5. श्रेष्ठः – उत्तमः
6. कृपा – दया
7. भूः – पृथ्वी, वसुधा
8. गानम् – गीतम्
9. वल्लिका – लता
10. खेदम् – दुःखम्

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. "न भारतात् श्रेष्ठतमोऽस्ति देशः" – कथम्?
2. भुवि भारतं कथं विलसति?
3. के बान्धवाः स्युः इति अव्वैयार् कथयति?



Unit 1.indd 6 06-06-2018 12:35:58

4. “पञ्चानामपि विस्पष्टं बुद्ध्वा कार्यं विधीयताम्” – के ते?

5. देशस्य पञ्च मण्डनानि कानि?

6. वैद्यः कथं निवारणं कुर्यात्?

7. भुवनादपि किं महत् स्यात्?

8. कः भुवि महीयते?

## VIII. सविस्तरम् उत्तरं लिखत-

1. द्रविडसुधायां अस्मद्देशम् अधिकृत्य किमुक्तमिति विवृणुत।

2. टिप्पणीं लिखत-

   (i) बन्धुः (ii) उत्तमदेशः (iii) औषधम्

3. विशदयत-

   (i) कार्यसाधकोपायः (ii) परोपकारः (iii) क्षमा

..........................................................

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### द्रविडभाषायां पञ्चमहाकाव्यानि (ஐம்பெரும் காப்பியங்கள்) -

1. சிலப்பதிகாரம் (शिलप्पधिकारम्) 2. மணிமேகலை (मणिमेखलै)

3. சீவகசிந்தாமணி (जीवकचिन्तामणिः) 4. வளையாபதி (वलैयापतिः)

5. குண்டலகேசி (कुण्डलकेशी)

### संस्कृतभाषायां पञ्चमहाकाव्यानि-

1. रघुवंशम् 2. कुमारसंम्भवम् 3. किरातार्जुनीयम् 4. शिशुपालवधम् 5. नैषधम्

### Weblinks :

1. https://sa.in.wikipedia.org/wiki/सुब्रह्मण्य_भारती

2. https://en.in.wikipedia.org/wiki/Avvaiyar

3. https://en.in.wikipedia.org/wiki/Thiruvalluvar

4. srisriramadesikan.com



Unit 1.indd 7 06-06-2018 12:35:58

द्वितीयः पाठः

# 2

Lesson – 2

# महाभक्तः कण्णप्पः

द्रविडदेशे विद्यमानेषु त्रिषष्ठिषु शिवभक्तेषु कण्णप्प-नायनार् इति विख्यातः शिवभक्तः अन्यतमः। तमधिकृत्य अस्मिन् पाठ्यभागे कथा उल्लिखिता।



पुरा आन्ध्रप्रदेशे राजनागः इति कश्चन व्याधः तीव्रः शिवभक्तः आसीत्। सः स्वपुत्रस्य "दिन्नः" इति कार्तिकेयस्य नाम स्थापितवान्।

एकदा सः व्याधकुमारः मृगयायै अरण्यम् अगच्छत्। यदृच्छया एकम् शिवलिङ्गम् दृष्टवान्। महाशिवभक्तस्य वंशे जातः अयं किरातकुमारः कथं ईश्वरम् उपासितव्यम् इति मार्गम् अजानन् समीपस्थं सुवर्णमुखी-नद्याः जलं स्ववदनेन आदाय तेन गण्डूषणेन जलेन शिवलिङ्गस्य अभिषेकम्



Unit 2.indd 8 06-06-2018 12:36:25

अकरोत् । स्वहस्तयोः पत्राणि पुष्पाणि च आनीय पूजाम् अकरोत् । सः यं मृगं मारयति तस्य शल्यं मांसम् (सूकरादि) तस्मै ईश्वराय अर्पयति स्म । ईश्वरः अपि तस्य हार्दिक-भक्त्या संतुष्टः तत् सर्वम् अङ्गीकृतवान्। किन्तु देवालयस्य अर्चकः तस्य व्याधस्य कार्यम् अजानन् प्रतिदिनं देवालयं गोमयेन जलेन पवित्रीकृतवान् ।

एकस्मिन् दिने अर्चकः 'कः एतत् असमीचीनम् कार्यम् करोति' इति देवमेव अपृच्छत् । तदा शंकरः "किरातस्य भक्तिम् त्वाम् प्रदर्शयामि" इति उवाच। अन्यस्मिन् दिने किरातकुमारः यथापूर्वं देवालयं प्राविशत्। तदा शिवलिङ्गस्य एकस्मात् नेत्रात् रक्तं स्रवति स्म । तत् दृष्ट्वा सः व्याधः शरेण स्वनेत्रम् उत्पाट्य शिवलिङ्गाय अर्पितवान् । ततः शिवलिङ्गस्य द्वितीयनेत्रात् रक्तं स्रवति स्म । अनुक्षणम् स्वपादाङ्गुल्या तत् द्वितीयनेत्रं लक्ष्यीकृत्य स्वनेत्रान्तरम् अपि उत्पाटयितुम् सन्नद्धः अभवत्। तदा किरातस्य भक्तिविशेषेण विस्मितः अर्चकः तस्य किरातस्य पादयोः अपतत् । भक्तपराधीनः ईश्वरः तयोः भक्तयोः मुक्तिसाम्राज्यं अनुग्रहीतवान् । ततः प्रभृति सः किरातकुमारः (दिन्नः) "कण्णप्पः" इति सुप्रसिद्धः अभवत्। अत एव उक्तम् -

"गुणाः पूजास्थानम् गुणिषु न च लिङ्गम् न च वयः" इति ।।

## अभ्यासः

### I. कठिनशब्दार्थः -

1. व्याधः – hunter
2. शिवभक्तः – devotee of Lord Siva
3. मृगयायै – for hunting
4. नदी – river
5. जलम् – water
6. वदनेन – by mouth
7. गण्डूषणेन – by gargling
8. मांसम् – meat
9. संतुष्टः – happiness
10. अर्चकः – priest
11. नेत्रम् – eye
12. रक्तम् – blood
13. शरः – arrow
14. अनुक्षणम् – every minute

### II. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. कः तीव्रः शिवभक्तः आसीत् ?
2. कार्तिकेयस्य नामन्तरं किम् ?
3. व्याधकुमारः किमर्थम् अरण्यम् अगच्छत् ?



Unit 2.indd 9 06-06-2018 12:36:25

4. अरण्ये व्याधकुमारः किं दृष्टवान् ?

5. व्याधकुमारः कस्याः नद्याः जलम् आनीतवान् ?

6. किरातकुमारः कथं शिवलिङ्गस्य अभिषेकम् अकरोत् ?

7. अर्चकः केन देवालयं पवित्रीकृतवान् ?

8. "किरातस्य भक्तिं त्वां प्रदर्शयामि" – कः कं प्रति उवाच ?

9. शिवलिङ्गस्य कस्मात् रक्तं स्रवति स्म ?

10. व्याधः शिवलिङ्गाय किम् अर्पितवान् ?

11. किरातस्य भक्तिविशेषेण विस्मितः अर्चकः किं कृतवान् ?

12. भक्तपराधीनः ईश्वरः तयोः किम् अनुग्रहीतवान् ?

## III. सविस्तरम् उत्तरं लिखत ।

1. किरातकुमारस्य चरितं यथाग्रन्थं लिखत ।

## IV. रिक्तस्थानानि पूरयत-

1. आन्ध्रप्रदेशे ________ इति कश्चन व्याधः आसीत्।

2. व्याधकुमारः मृगयायै ________अगच्छत् ।

3. जलं स्ववदनेन आदाय तेन ________ जलेन लिङ्गस्य अभिषेकं अकरोत् ।

4. शिवलिङ्गस्य नेत्रात् ________ स्रवति स्म।

5. शरेण स्वनेत्रं ________ लिङ्गाय अर्पितवान्।

## V. अधः प्रदत्तपदानां विशेष्य-विशेषणानि जानन्तु ।

| | | विशेष्यम् | विशेषणम् |
|---|---|---|---|
| 1. कश्चन व्याधः | - | ________ | ________ |
| 2. गण्डूषणेन जलेन | - | ________ | ________ |
| 3. शल्यं मांसम् | - | ________ | ________ |
| 4. विस्मितः अर्चकः | - | ________ | ________ |
| 5. भक्तपराधीनः ईश्वरः | - | ________ | ________ |

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### पदविस्तारः-

**कार्तिकेयः-** कार्तिकेयो महासेनः शरजन्मा षडाननः ।

पार्वतीनन्दनः स्कन्दः सेनानीरग्निर्भूर्गुहः ।।

बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ।

षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ।।

**शिवः -** शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ।

ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः ।।

भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।

मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ।।

उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।

वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ।।

कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।

हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ।।

गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।

व्यामकेशो भवो भीमः स्थाणू रुद्र उमापतिः ।।

### Weblink :

1. https://en.in.wikipedia.org/wiki/Kannappa_Nayanar



Unit 2.indd 11 06-06-2018 12:36:25

## व्याकरण–अभ्यासः - 1

| | | |
|---|---|---|
| लिङ्गम् | - | Gender |
| पुल्लिङ्गम् | - | Masculine |
| स्त्रीलिङ्गम् | - | Feminine |
| नपुंसकलिङ्गम् | - | Neuter |

| | | |
|---|---|---|
| वचनम् | - | Number |
| एकवचनम् | - | Singular |
| द्विवचनम् | - | Dual |
| बहुवचनम् | - | Plural |

| | | |
|---|---|---|
| विभक्तिः | - | Case |
| प्रथमा | - | Nominative |
| द्वितीया | - | Accusative |
| तृतीया | - | Instrumental |
| चतुर्थी | - | Dative |
| पञ्चमी | - | Ablative |
| षष्ठी | - | Genitive |
| सप्तमी | - | Locative |
| संबोधन-प्रथमा | - | Vocative |



Unit 2.indd 12 06-06-2018 12:36:25

## (i) अजन्तपुल्लिङ्गशब्दाः

### अकारन्तः पुल्लिङ्गः "राम"शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |
| सम्बोधन-प्रथमा | हे राम ! | हे रामौ ! | हे रामाः ! |

### इकारान्तःपुल्लिङ्गः"हरि" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधन-प्रथमा | हे हरे ! | हे हरी ! | हे हरयः ! |



Unit 2.indd 13 06-06-2018 12:36:25

## उकारन्तः पुल्लिङ्गः "गुरु" शब्दः ।।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| सम्बोधन-प्रथमा | हे गुरो ! | हे गुरू ! | हे गुरवः ! |

## ऋकारान्तः पुल्लिङ्गः "पितृ" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधन-प्रथमा | हे पितः ! | हे पितरौ ! | हे पितरः ! |



Unit 2.indd 14 06-06-2018 12:36:26

## (ii) धातुः – परस्मैपदी - लट् (Present Tense)

### वद् – to speak

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | वदति | वदतः | वदन्ति |
| मध्यमपुरुषः (II Person) | वदसि | वदथः | वदथ |
| उत्तमपुरुषः (III Person) | वदामि | वदावः | वदामः |

### भव् – to be

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः (II Person) | भवसि | भवथः | भवथ |
| उत्तमपुरुषः (III Person) | भवामि | भवावः | भवामः |

### पठ् – to read

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः (II Person) | पठसि | पठथः | पठथ |
| उत्तमपुरुषः (III Person) | पठामि | पठावः | पठामः |



Unit 2.indd 15 06-06-2018 12:36:26

## अनुच्छेदलेखनम् –1

## (Comprehension – 1)



भारतदेशस्य प्रसिद्धा पवित्रतमा च नदी भागीरथी अस्ति। इयं नदी हिमालयात् निर्गच्छति। अस्याः जलं पवित्रतमं मन्यन्ते। अस्याः तीरे विविधानि नगराणि वर्तन्ते। तेषु हरिद्वारं, वाराणसी च प्रसिद्धौ। राज्ञः भगीरथस्य तपः प्रभावेन प्रयत्नेन च इयं नदी भूमिं प्रापिता। अतः एषा भागीरथी इति प्रसिद्धा। जनाः श्रद्धया अत्र आगत्य स्नानं कुर्वन्ति, येन तेषां पापक्षयः भवति इति विश्वासः। अस्याः महत्वं वाचा कथयितुं न शक्यते।

प्रश्नाः-

1. भारतदेशस्य प्रसिद्धा पवित्रतमा च नदी का ?
2. भागीरथी नदी कस्मात् निर्गच्छति ?
3. नद्याः तीरे कानि वर्तन्ते ?
4. कस्य तपः प्रभावेन इयं नदी भूमिं प्रापिता?
5. अस्याः नद्याः महत्वं कया कथथितुं न शक्यते?

## अनुवादः – 1

## (Translation - 1)

कश्चन वञ्चकः रजकः स्वीयं गर्दभं व्याघ्रस्य चर्मणा आवृत्य, स्वग्रामे क्षेत्रेषु सस्यानि भक्षयितुं मुमोच। सर्वे क्षेत्रपालाः रासभं व्याघ्रं मत्वा, अतीव भीताः आसन्। अतः स्वस्वक्षेत्रे कृषिं विहाय पलायांचक्रिरे। केषुचित् दिनेषु गर्दभः पुष्टः अभवत्। एकदा अन्यः रासभः तत्र आजगाम। अमुं दृष्ट्वा व्याघ्रचर्मणा आवृतः गर्दभः स्वभावम् अनुसृत्य परुषेण स्वरेण शब्दम् अकरोत्। सद्यः एव पूर्वं पलायिताः कृषीवलाः निवृत्य “वस्तुतः अयं रासभः, व्याघ्रः न भवति, केवलं व्याघ्रचर्मणा आवृतः एव” इति सत्यं जानन्ति स्म। अथ तं गर्दभं दण्डैः संताड्य, मारयामासुः ; धावकं च अनिन्दन्।।

# तृतीयः पाठः

3 Lesson – 3

## पम्पावर्णनम्

रामस्य अयनं (चरितं) रामायणम् । रामायणम् आदिकाव्यम् इति प्रसिद्धम् । अस्मिन् ग्रन्थे चतुर्विंशतिसहस्रश्लोकाः (24,000) सन्ति। एते श्लोकाः बाल – अयोध्या – आरण्य – किष्किन्धा – सुन्दर – युद्ध- उत्तर इति सप्तकाण्डेषु विभक्ताः सन्ति। अस्मिन् ग्रन्थे प्रकृतेः वर्णनम् सौन्दर्येण वर्णितम् अस्ति । तत्रापि नदीनां वर्णने पम्पायाः वर्णनं अति चमत्कारं जनयति । तदेव अत्र पाठ्यविषयत्वेन वर्तते।

सौमित्रे! शोभते पम्पा वैडूर्यविमलोदका ।
फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः ।। 1

सौमित्रे! पश्य पम्पायाः काननं शुभदर्शनम् ।
यत्र राजन्ति शैलाभा द्रुमाः सशिखरा इव ।। 2





Unit 3.indd 17 06-06-2018 12:38:22

शोकार्तस्यापि मे पम्पा शोभते चित्रकानना ।
व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा ।। 3

नलिनैरपि संछन्ना ह्यत्यर्थं शुभदर्शना ।
सर्पव्यालानुचरिता मृगद्विजसमाकुला ।। 4

अधिकं प्रतिभात्येतत् नीलपीतं तु शाद्वलम् ।
द्रुमाणां विविधैर्पुष्पैः परिस्तोमैरिवार्पितम् ।। 5

इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वशः ।
नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ।। 6

एषा प्रसन्नसलिला पद्मनीलोत्पलायिता ।
हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता ।। 7

जले तरुणसूर्याभैः षट्पदाहतकेसरैः ।
पङ्कजैः शोभते पम्पा समन्तात् अभिसंवृता ।। 8

चक्रवाकयुता नित्यं चित्रप्रस्थवनान्तरा ।
मातङ्गमृगयूथैश्च शोभते सलिलार्थिभिः ।। 9

पवनाहतवेगाभिः ऊर्मिभिः विमलेऽम्भसि ।
पङ्कजानि विराजन्ते ताड्यमानानि लक्ष्मण ।। 10

(श्रीमद्-रामायणे किष्किन्धाकाण्डे प्रथमः सर्गः)

**कविपरिचयः** श्रीमद्-रामायणस्य कर्ता महर्षिः वाल्मीकिः। अयम् आदिकविः इति प्रसिद्धः। अयं ब्रह्मणः आज्ञया नारदमुखात् रामकथां श्रुत्वा रामायणम् अरचयत् ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. द्रुमः - tree
2. काननम् - forest
3. व्यालः - snake
4. मतङ्गः - elephant

5. षट्पदः - bee

6. ऊर्मिः - waves

7. पङ्कजः - lotus

8. शिखराः - peaks

9. उदकम् - water

10. मृगः - deer

11. अम्भः - water

12. पवनः - wind

13. शैलः - mountain

14. उत्पलम् - lilly

## II. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. राजन्ति – लट् - प्रथमपुरुषः, बहुवचनम् of राज् to shine
2. शोभते – लट् - आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of शोभ् to shine
3. प्रतिभाति – लट् – प्रथमपुरुषः, एकवचनम् of भा with प्रति to shine
4. इमानि – इदं शब्दस्य नंपुसकलिङ्गे प्रथमाविभक्तिः, बहुवचनम्
5. पश्य – लोट् – मध्यमपुरुषः, एकवचनम् of दृश् to see.
6. प्रकाशन्ते – लट् – आत्मनेपदी, प्रथमपुरुषः, बहुवचनम् of प्रकाश् to shine
7. एषा – एतद् शब्दस्य स्त्रीलिङ्गे प्रथमाविभक्तिः, एकवचनम्
8. समन्तात् – Indeclinable (अव्ययम्), meaning everywhere.

## III. अधो लिखितानां पदानां विग्रहं लिखत-

1. सौमित्रे - ____________________
2. शोकार्तः - ____________________
3. नीलोत्पलम् - ____________________
4. पङ्कजम् - ____________________
5. शुभदर्शनम् - ____________________
6. शीतोदकम् - ____________________
7. सौगन्धः - ____________________
8. षट्पदाः - ____________________
9. चित्रकाननम् - ____________________

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत -

1. विविधैर्द्रुमैः - विविधैः + द्रुमैः
2. शीतोदकम् - शीत + उदकम्
3. प्रतिभात्येतत् - प्रतिभाति + एतत्
4. मृगयूथैश्च - मृगयूथैः + च
5. विमलेऽम्भसि - विमले + अम्भसि
6. अत्यर्थम् - अति + अर्थम्
7. इवार्पितम् - इव + अर्पितम्
8. पद्मोत्पलवती - पद्म + उत्पलवती
9. नलिनैरपि - नलिनैः + अपि
10. सलिलार्थिभिः - सलिल + अर्थिभिः

## V. अधो निर्दिष्टानां पदानां पर्यायपदानि लिखत-

1. द्रुमः - वृक्षः, तरुः
2. काननम् - अरण्यम्, वनम्
3. व्यालः - नागः, सर्पः
4. मतङ्गः - इभः, गजः
5. षट्पदः - मधुकरः, मधुपः
6. ऊर्मिः - तरङ्गः, वीचिः
7. पङ्कजः - पद्मम्, सरोरुहम्
8. शिखराः - शृङ्गाः, तुङ्गाः
9. उदकम् - वारि, जलम्, तोयम्
10. मृगः - कुरङ्गः, हरिणः
11. पवनः - वायुः, अनिलः
12. शैलः - पर्वतः, अचलः
13. उत्पलम् - कुमुदम्
14. सूर्यः - अर्कः, इनः

## VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत -

1. विमलम् × कलुषम्
2. शुभम् × अशुभम्
3. एकधा × बहुधा
4. शीतम् × उष्णम्
5. अधिकम् × न्यूनम्
6. सुगन्धम् × दुर्गन्धम्
7. तरुणम् × अतरुणम्
8. नित्यम् × अनित्यम्

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम् -

1. रामायणे कति काण्डानि सन्ति ?
2. रामायणस्य कस्मिन् काण्डे पम्पावर्णनं विद्यते ?
3. कीदृशी पम्पा शोभते ?
4. कानने किं राजन्ति ?
5. "शोकार्तस्यापि मे पम्पा शोभते" – कः कं प्रति उवाच ?



Unit 3.indd 20 06-06-2018 12:38:22

6. पम्पायां किम् अधिकं प्रतिभाति ?

7. नलिनानि कथं प्रकाशन्ते ?

8. "पङ्कजैः शोभते पम्पा" – विवृणुत।

## VIII. सविस्तरम् उत्तरत-

1. यथाग्रन्थं पम्पां वर्णयत।

## IX. अधो लिखितानां श्लोकानां पूरणं कुर्वन्तु-

1. शोकार्तस्यापि ________ शोभते चित्रकानना ।
   व्यवकीर्णा __________ शीतोदका शुभा ।।

2. इमानि ________ पश्य लक्ष्मण सर्वशः ।
   नलिनानि प्रकाशन्ते जले ________ ।।

3. ________ नित्यं चित्रप्रस्थवनान्तरा ।
   मातङ्गमृगयूथैश्च शोभते __________ ।।

4. सौमित्रे ! शोभते पम्पा _________ ।
   ___________ शोभिता विविधैर्द्रुमैः ।।

5. जलं ___________ षट्पदाहतकेसरैः ।
   _____ शोभते पम्पा समन्तात् अभिसंवृता ।।

## X. विशेषणानि विशेष्यैः सह योजयत-

| | विशेष्यम् | - | विशेषणम् |
|---|---|---|---|
| 1. | काननम् | - | पवनाहतवेगाभिः |
| 2. | नलिनानि | - | वैडूर्यविमलम् |
| 3. | उदकम् | - | शुभदर्शनम् |
| 4. | पम्पा | - | शुभगन्धीनी |
| 5. | ऊर्मिभिः | - | फुल्लपद्मोत्पलवती |



Unit 3.indd 21 06-06-2018 12:38:22

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### अयं रामायणग्रन्थः विश्वभाषासु अनूदितः भवति ।

| भाषा | ग्रन्थस्य नाम | ग्रन्थकर्ता |
|---|---|---|
| द्रविडभाषा | कम्बरामायणम् | Kambar |
| हिन्दी | रामचरितमानस् | Thulasidas |
| तेलुगु | रङ्गनाथ रामायणम् | Gona Buddha Reddy |
| मळयालम् | अध्यात्मरामायणम् | Thunchaththu Ramanujan Ezhuthachan |
| कन्नड | श्रीरामायणदर्शनम् | Kuvempu |

### कविकोकिलः वाल्मीकिः:-

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।

वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ।। इति श्लोकेन वाल्मीकिरेव रामायणस्य प्रणेता इति ज्ञायते।

यदा सः तपसि स्थितः, तदा तस्य उपरि वल्मीकम् अभवत्। वल्मीकान्तरितः सः महता कालेन ततः निर्गतः इत्यनेन तस्य वाल्मीकिरिति नाम अन्वर्थम् अभवत्।

कूजन्तं राम रामेति मधुरं मधुराक्षरम्।

आरुह्य कविता-शाखां वन्दे वाल्मीकि-कोकिलम्।।

वाल्मीकिः काव्यकानने राम-रामेति मधुरं कूजन् कलरवरुचिरः कोकिल इति संस्मर्यते सूरिभिः। स एव आदिकविः, तस्य रामायणम् आदिकाव्यमिति च प्रसिद्धम्।

अद्यत्वे सप्तकाण्डात्मकं श्रीमद्रामायणम्। पुनश्च चतुर्विंशतिसहस्रश्लोघटितं पञ्चशतसर्गघटितञ्च। एतस्य सप्तकाण्डानि क्रमशः बालकाण्डम्, अयोध्याकाण्डम्, अरण्यकाण्डम्, किष्किन्धाकाण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम्, उत्तरकाण्डञ्च सन्ति।

बालकाण्डे रामजन्मतः रामविवाहपर्यन्तम्, अयोध्याकाण्डे रामराज्याभिषेकप्रसङ्गेन सह तस्य अकस्मात् वनगमनम्, अरण्यकाण्डे पञ्चवट्याः वर्णनं, खरदूषणवधं, किष्किन्धाकाण्डे हनूमानस्य समुद्रसन्तरणम्, सुन्दरकाण्डे लङ्कावर्णनं, हनुमानेन अशोकवाटिकायां सीतादर्शनं, लङ्कापुरीदाहनं च, युद्धकाण्डे सेतुनिर्माणम्, युद्धे रावणहननम्, सीतासम्प्राप्तिः, राज्याभिषेकश्च, उत्तरकाण्डे सीतापरित्यागः, लवकुशयोः रामेण सह सम्मिलनं, सीतायाः पृथिव्यां प्रवेशः च वर्णिताः विलसन्ति।।

Weblink : 1. https://en.in.wikipedia.org/wiki/Pambai

2. https://sa.in.wikipedia.org/wiki/Valmiki

2. https://sa.in.wikipedia.org/wiki/Ramayanam



Unit 3.indd 22 06-06-2018 12:38:23

चतुर्थः पाठः

4

Lesson – 4

# प्रतिमागृहम्

अयं पाठ्यभागः `प्रतिमानाटकम्' इति ग्रन्थात् स्वीकृतः । अस्य रचयिता भासः। अस्मिन् नाटके सप्त अङ्काः सन्ति । अत्र रामायणस्य आद्यानां त्रयाणां काण्डानां कथा वर्णिता । अस्मिन् पाठ्यभागे भरतस्य प्रतिमागृहप्रवेशनविषयः वर्णितः अस्ति । अनेन प्राचीनानां राज्ञां पाषाणमयप्रतिमूर्तीनां संग्रहालयप्रथायाः प्रमाणं ज्ञायते।



भरतः – (किञ्चिद् गत्वावलोक्य) कस्य नु खलु दैवतस्य स्थानं भविष्यति । नेह किञ्चित् प्रहरणं ध्वजो वा बहिश्चिह्नं दृश्यते । भवतु, प्रविश्य ज्ञास्ये । (प्रविश्यावलोक्य) अहो! क्रियामाधुर्यं पाषाणानाम् । अहो भावगतिराकृतीनाम् । दैवतोद्दिष्टानामपि मानुषविश्वासं तासां प्रतिमानाम् । किन्नु खलु चतुर्दैवतोऽयं स्तोमः। अथवा यानि तानि भवन्तु । अस्ति तावन्मे मनसि प्रहर्षः ।



Unit 4.indd 23 06-06-2018 12:39:20

कामं दैवतमित्येव युक्तं नमयितुं शिरः ।
वार्षलस्तु प्रणामः स्यादमन्त्रार्चितदैवतः ।। (प्रविश्य)

देवकुलिकः – भोः, नैत्यकावसाने प्राणिधर्ममनुतिष्ठति मयि को नु खल्वयमासां प्रतिमानां अल्पान्तराकृतिरिव प्रतिमागृहं प्रविष्टः । भवतु, प्रविश्य ज्ञास्ये ।

(प्रविशति ।)

भरतः – नमोऽस्तु ।

देवकुलिकः – न खलु न खलु प्रणामः कार्यः ।

भरतः – मा तावद् भोः ।
वक्तव्यं किञ्चिदस्मासु विशिष्टः प्रतिपाल्यते ।
किं कृतः प्रविषेधोऽयं नियमप्रभविष्णुता ।।

देवकुलिकः – न खल्वेतैः कारणैः प्रतिषेधयामि भवन्तम् । किन्तु दैवतशङ्कया प्रणामं परिहरामि । क्षत्रिया ह्यत्र भवन्तः ।

भरतः – एवम् । क्षत्रिया ह्यत्र भवन्तः ! अथ के नामात्रभवन्तः?

देवकुलिकः – इक्ष्वाकवः ।

भरतः – (सहर्षम्) इक्ष्वाकव इति । एते तेऽयोध्याभर्तारः ।

एते ते दैवतानामसुरपुरवधे गच्छन्त्यभिसरीं
एते ते शक्रलोके सपुरजनपदा यान्ति स्वसुकृतैः ।
एते ते प्राप्नुवन्तः स्वभुजबलजितां कृत्स्नां वसुमतीं
एते ते मृत्युना ये चिरमनवसिताश्छन्दं मृगयता ।।
भोः, यदृच्छया खलु मया महत् फलमासादितम्। अभिधीयतां कस्तावत् अत्रभवान् ।

देवकुलिकः – अयं खलु तावत् सन्निहितसर्वरत्नस्य विश्वजितो यज्ञस्य प्रवर्तयिता प्रज्वलितधर्मप्रदीपो दिलीपः ।

भरतः – नमोऽस्तु धर्मपरायणाय । अभिधीयतां कस्तावत् अत्रभवान् ।

देवकुलिकः – अयं खलु तावत् संवेशनोत्थापनयोः अनेकसज्जनसहस्रप्रयुक्तपुण्याहशब्दरवो रघुः ।

भरतः – अहो बलवान् मृत्युरेतामपि रक्षामतिक्रान्तः ।
नमोऽस्तु सज्जनावेदितराज्यफलाय । अभिधीयतां कस्तावत् अत्रभवान् ।



Unit 4.indd 24 06-06-2018 12:39:20

देवकुलिकः – अयं खलु तावत् प्रियावियोगनिर्वेदपरित्यक्तराज्यभारः नित्यावभृथप्रशान्तरजा अजः ।

भरतः – नमोऽस्तु श्लाघनीयपश्चात्तापाय । (दशरथप्रतिमाम् अवलोकयन् पर्याकुलो भूत्वा)
भोः, बहुमानव्याक्षिप्तेन मनसा सुव्यक्तं नावधारितम् । अभिधीयतां कस्तावत् अत्रभवान् ।

देवकुलिकः – अयं दिलीपः।

भरतः – पितृपितामहो महाराजस्य । ततस्ततः ।

देवकुलिकः – अत्रभवान् रघुः ।

भरतः – पितामहो महाराजस्य । ततस्ततः ।

देवकुलिकः – अत्रभवान् अजः ।

भरतः – पिता तातस्य । किमिति किमिति ।

देवकुलिकः – अयं दिलीपः, अयं रघुः, अयम् अजः ।

भरतः – भवन्तं किञ्चित् पृच्छामि । धरमाणानामपि प्रतिमाः स्थाप्यन्ते ?

देवकुलिकः – न खलु, अतिक्रान्तानामेव ।

भरतः – तेन ह्यापृच्छे भवन्तम् ।

देवकुलिकः – तिष्ठ ।
येन प्राणाश्च राज्यं च स्त्रीशुल्कार्थे विसर्जिताः ।
इमां दशरथस्य त्वं प्रतिमां किं न पृच्छसे ।।

भरतः – हा तात! (मूर्च्छितः पतति । पुनः प्रत्यागत्य)
हृदय भव सकामं यत्कृते शङ्कसे त्वं,
शृणु पितृनिधनं तद् गच्छ धैर्यं च तावत् ।
स्पृशति तु यदि पापो मामयं शुल्कशब्दः,
त्वथ च भवति सत्यं तत्र देहो विशोध्यः ।।

देवकुलिकः – आर्येति इक्ष्वाकुकुलालापः खल्वयम् । कश्चित् कैकेयीपुत्रो भरतो भवान् ननु।

भरतः – दशरथपुत्रो भरतोऽस्मि, न कैकेय्याः ।

देवकुलिकः – तेन ह्यापृच्छे भवन्तम् ।

भरतः – तिष्ठ, शेषमभिधीयताम् ।

देवकुलिकः – का गतिः । श्रूयताम् । उपरतस्तत्रभवान् दशरथः । सीतालक्ष्मणसहायस्य रामस्य वनगमनप्रयोजनं न जाने ।

भरतः – कथं कथम्, आर्योऽपि वनं गतः ?

(द्विगुणं मोहमुपागतः ।)



Unit 4.indd 25 06-06-2018 12:39:20

देवकुलिकः – कुमार, समाश्वसिहि समाश्वसिहि।

भरतः – (समाश्वस्य)

अयोध्यामटवीभूतां पित्रा भ्रात्रा च वर्जिताम्।
पिपासार्तोऽनुधावामि, क्षीणतोयां नदीमिव ।।

## अभ्यासः

### I. कठिनशब्दार्थः-

1. ध्वजः – flag
2. पाषाणानाम् – of stones
3. आकृतीनाम् – of forms
4. प्रतिमानाम् – of statues
5. शिरः – head
6. गृहम् – home
7. प्रविष्टः – entered
8. प्रतिषेधः – refused
9. शङ्का – doubt
10. भर्तारः – leaders
11. शक्रः – lord indra
12. जनपदः – territory
13. कृत्स्ना – entire
14. वसुमती – earth
15. यज्ञः – sacrifice
16. प्रदीपः – lamp
17. सहस्रम् – thousand
18. मृत्युः, निधनम् – death
19. पितृपितामहः– great grand father
20. पितामहः – grand father
21. भ्राता – brother
22. पिपासा – thirsty

### II. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. प्रतिमानाटकस्य कर्ता कः?
2. भरतः कुत्र प्रविशति ?
3. भरतः प्रतिमागृहे किं पश्यति?
4. अयोध्याभर्तॄणां महत्वं किम् ?
5. देवकुलिकः दिलीपं कथं वर्णयति स्म ?



Unit 4.indd 26 06-06-2018 12:39:21

6. देवकुलिकः रघुं कथम् अवर्णयत् ?

7. प्रतिमागृहे केषां प्रतिमाः स्थाप्यन्ते ?

8. दशरथस्य मृत्यं ज्ञात्वा भरतः किं करोति ?

9. "क्षीणतोयां नदीमिव" – विशदयत।

## III. सविस्तरम् उत्तरं लिखत-

1. भरत-देवकुलिकयोः सम्भाषणं यथाग्रन्थं लिखत।

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

महाकविः भासः कश्चित् महान् संस्कृतनाटककारः। भासस्य त्रयोदशनाटकानि उपलभ्यन्ते। भासनाटकचक्रम् इति तत्कृतनाटकानां नाम व्यवह्रियते।

तानि –

1. स्वप्नवासवदत्तम्
2. प्रतिज्ञायौगन्धरायणम्
3. ऊरुभङ्गम्
4. दूतवाक्यम्
5. पञ्चरात्रम्
6. बालचरितम्
7. दूतघटोत्कचम्
8. मध्यमव्यायोगः
9. प्रतिमानाटकम्
10. अभिषेकनाटकम्
11. अविमारकम्
12. चारुदत्तम्
13. कर्णभारम्

तेषु प्रतिज्ञायौगन्धरायणस्वप्नवासवदत्ताऽविमारकाणि त्रीणि बृहत्कथा आधारितानि। प्रतिमानाटकाभिषेकश्चेति द्वे रामायणमूले। मध्यमव्यायोगपञ्चरात्रदूतघटोत्कचकर्णभारोरुभङ्ग-दूतवाक्यानि षट् महाभारताश्रयाणि। बालचरितं भागवताश्रयम्। चारुदत्तं च कल्पितकथमिति विवेकः।



Unit 4.indd 27 06-06-2018 12:39:21

## Weblinks :

1. https://sa.in.wikipedia.org/wiki/Pratimanatakam
2. https://sa.in.wikipedia.org/wiki/भासः

## प्रतिमानाटकम् –

अङ्कसप्तकमिह । रामायणकथाधारेण एतत् प्रतिमानाटकं रचितमस्ति । कविः रामायणस्य कथा किञ्चित् व्यत्यस्य कथावितानं तनोति । अस्य कवेः काले रामायणस्य सर्वाण्यपि पात्राणि आदर्शप्रायाणि आसन् इति अस्मात् ग्रन्थात् अवगन्तुं शक्यते । यतः स्वस्य नाटके सर्वाणि पात्राणि गुणवन्ति दोषरहितानि च चित्रितानि भासेन ।

अस्मिन् नाटके कैकेयी अपि गुणवतीति प्रतिपादयितुम् अनेन प्रयत्नः कृतः दृश्यते । यतः षष्ठेऽङ्के भरतः सुमन्त्रमुखात् रामस्य वनगमनरहस्यं जानाति । तेन च खिन्नमानसः स्वमाता दोषरहितेति विदित्वा मातुः कैकेय्याः क्षमां याचते ।

अस्य 'प्रतिमानाटकम्' इति नामकरणे हेतुः तृतीयोऽङ्कः । अत्रस्थं प्रतिमादृश्यं कवेः प्रतिभायाः साक्षीभवति । अस्मिन्नङ्के विद्यमाना नाटकीयता अत्यन्तं हृद्यङ्गमा वर्तते । कोमलहृदयी भरतः पितरं दशरथं द्रष्टुकामः अयोध्यामागच्छत् । अयोध्यायां दशरथस्य मरणोदन्तः तस्य हृदयविद्रावकम् अभवत्।

वाल्मीकिरामायणे कैकेयी एव भरताय दशरथस्य मरणवार्तां विवृणोति । किन्तु अत्र तं प्रसङ्गं व्यत्यस्य, भरतः एतां दुष्किंवदन्तीं मन्दं मन्दं यथा जानीयात् तथा कविः प्रतिमागृहस्य कल्पनां योजयति । यस्मिन् प्रतिमागृहे सूर्यवंशस्य अतीतानां राज्ञां प्रतिमाः स्थापिताः आसन्, ताः भरतः ऐदम्प्राथम्येन पश्यन्ति ।

तत्र दिलीपः, अजः, रघुः, तदनन्तरं दशरथः एवं क्रमेण प्रतिमाः विन्यस्ताः आसन् । तत्र अतीतानामेव प्रतिमाः स्थापिता इति देवकुलिकात् ज्ञात्वा भरतः मूर्च्छाक्रान्तः भवति। एवं पितुः मरणं मृतानां प्रतिमादर्शनेन प्रतिमितं भवति भरतस्य मनसि । एतेन नाम सार्थकं भवति ।



Unit 4.indd 28 06-06-2018 12:39:21

## व्याकरण–अभ्यासः - 2

### (ii) अजन्तस्त्रीलिङ्गशब्दाः

#### आकारान्तः स्त्रीलिङ्गः “लता” शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | लताभ्याम् | लताभ्यः |
| पञ्चमी | लतायाः | लताभ्याम् | लताभ्यः |
| षष्ठी | लतायाः | लतयोः | लतानाम् |
| सप्तमी | लतायाम् | लतयोः | लतासु |
| सम्बोधन-प्रथमा | हे लते ! | हे लते ! | हे लताः ! |

#### इकारान्तः स्त्रीलिङ्गः “मति” शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः, मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः, मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |
| सम्बोधन-प्रथमा | हे मते ! | हे मती ! | हे मतयः ! |



Unit 4.indd 29 06-06-2018 12:39:21

## उकारान्तः स्त्रीलिङ्गः "धेनु" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धेनुः | धेनू | धेनवः |
| द्वितीया | धेनुं | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्यां | धेनुभिः |
| चतुर्थी | धेन्वै, धेनवे | धेनुभ्यां | धेनुभ्यः |
| पञ्चमी | धेन्वाः, धेनोः | धेनुभ्यां | धेनुभ्यः |
| षष्ठी | धेन्वाः, धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेन्वाम्, धेनौ | धेन्वोः | धेनुषु |
| सम्बोधन-प्रथमा | हे धेनो ! | हे धेनू ! | हे धेनवः ! |

## ऋकारान्तः स्त्रीलिङ्गः मातृ शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| द्वितीया | मातरं | मातरौ | मातॄः |
| तृतीया | मात्रा | मातृभ्यां | मातृभिः |
| चतुर्थी | मात्रे | मातृभ्यां | मातृभ्यः |
| पञ्चमी | मातुः | मातृभ्यां | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातॄणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु |
| सम्बोधन-प्रथमा | हे मातः ! | हे मातरौ ! | हे मातरः ! |



Unit 4.indd 30 06-06-2018 12:39:21

## (ii) धातुः – परस्मैपदी - लङ् (Past Tense)

### वद् – to speak

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | अवदत् | अवदताम् | अवदन् |
| मध्यमपुरुषः (II Person) | अवदः | अवदतम् | अवदत |
| उत्तमपुरुषः (III Person) | अवदम् | अवदाव | अवदाम |

### भव् – to be

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः (II Person) | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः (III Person) | अभवम् | अभवाव | अभवाम |

### पठ् – to read

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः (II Person) | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः (III Person) | अपठम् | अपठाव | अपठाम |



Unit 4.indd 31 06-06-2018 12:39:21

# अनुच्छेदलेखनम् – 2

## (Comprehension – 2)



एकदा विस्मिताः मुनयः वसिष्ठम् अब्रुवन्। 'भगवन् कः अयं पुरुषः? किम् आनीतं पात्रे ?' इति। सः प्रणिधानेन ज्ञात्वा एवं प्राह- अस्ति रावणः नाम राक्षसः । सः देवान् पीडयामास । ते च क्षीरसमुद्रं गत्वा श्रियः पतिं शरणम् अगच्छन् । सः तान् एवम् अवादीत्– 'अहम् अयोध्यायां दशरथस्य पुत्रः भूत्वा रावणं हनिष्यामि। यूयं च वानराः भूत्वा मम साहाय्यम् आचरत' इति। ते तु तथा इति प्रत्यगच्छन्। अथ भगवान् किङ्करम् आहूय आदिदेश –'पायसम् एतत् दशरथाय अर्पय' इति। सः अयं भगवता अनुप्रविष्टं पायसम् आजहार" इति ।

### प्रश्नाः -

1. विस्मिताः मुनयः कम् अब्रुवन्?
2. रावणः कान् पीडयामास?
3. देवाः क्षीरसमुद्रं गत्वा कं शरणम् अगच्छन्?
4. 'यूयं वानराः भूत्वा साहाय्यम् आचरत' इति केन उक्तम्?
5. भगवान् किङ्करं पायसं कस्मै अर्पयितुम् आदिदेश?

# अनुवादः – 2

## (Translation – 2)

कस्यचित् वृक्षस्य शाखायां काकदम्पती सुखं न्यवसताम्। तस्यैव तरोः कोटरे वसन् कोऽपि सर्पः तयोः अण्डानि असकृत् अभक्षयत्। अनेन, ते नितान्तं विषण्णौ बभूवतुः। एकदा गर्भवती वायसी वायसम् अभणत् -"प्रिय! आवयोः शत्रोः उरगस्य मारणोपायं चिन्तय" इति। कदाचित् राज्ञी तडागस्य तीरे स्वाभरणानि निधाय स्नानम् अकरोत्। वायसः सहसा राज्ञ्याः अनर्घं हारं चञ्च्वा गृहीत्वा, भुजङ्गस्य कोटरे अक्षिपत्। एतद्वीक्ष्य केचन राजभटाः, भुजगस्य कोटरं प्राप्य, तं निहत्य आभरणं राजमहिष्यै अर्पयामासुः। वायसी स्वभर्तुः सामर्थ्यं भृशं ननन्द। ततः प्रभृति ते प्रियदम्पती सानन्दम् अवसताम्।



Unit 4.indd 32 06-06-2018 12:39:21

पञ्चमः पाठः

5

Lesson – 5

# यक्षप्रश्नः

अयं पाठ्यभागः महाभारते वनपर्वणि अस्ति । महाभारतं तु व्यासेन विरचितम्। पाण्डवाः अज्ञातवासकाले द्वैतवने निवसिताः । तदा युधिष्ठिरयक्षयोः संवादः प्रश्नोत्तररूपेण वर्णितः अस्ति। अत्र यक्षेण पृष्टाः प्रश्नाः युधिष्ठिरेण उत्तरिताः। ततः कानिचन प्रश्नोत्तराणि अत्र प्रदत्तानि विद्यन्ते।

यक्षः -

इन्द्रियार्थाननुभवन् बुद्धिमान् लोकपूजितः ।
संमतः सर्वभूतानां उच्छ्वसन् को न जीवति ।। 1

युधिष्ठिरः -

देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ।
न निर्वपति पञ्चानां उच्छ्वसन्न स जीवति ।। 2



यक्षः -

कोऽतिथिः सर्वभूतानां
किंस्विद्धर्मं सनातनम् ।
अमृतं किंस्विद्राजेन्द्र
किंस्वित् सर्वमिदं जगत् ।। 3



Unit 5.indd 33 06-06-2018 12:40:17

युधिष्ठिरः -

अतिथिः सर्वभूतानामग्निः सोमो गवामृतम् ।
सनातनोऽमृतो धर्मो वायुः सर्वमिदं जगत् ।। 4

यक्षः -

कश्च धर्मः परो लोके कश्च धर्मः सदाफलः ।
किं नियम्य न शोचन्ति कैश्च सन्धिर्न जीर्यते ।। 5

युधिष्ठिरः -

आनृशंस्यं परो धर्मः त्रयीधर्मः सदाफलः ।
मनो यस्य न शोचन्ति सन्धिः सद्भिर्न जीर्यते ।। 6

यक्षः -

प्रियवचनवादी किं लभते
विमृशितकार्यकरः किं लभते ।
बहुमित्रकरः किं लभते
धर्मे रतः किं लभते कथय ।। 7

युधिष्ठिरः -

प्रियवचनवादी प्रियो भवति
विमृशितकार्यकरोऽधिकं जयति।
बहुमित्रकरः सुखं वसते
यश्च धर्मरतः स गतिं लभते ।। 8



Unit 5.indd 34 06-06-2018 12:40:17

## अभ्यासः

### I. अधो दत्तानाम् शब्दानाम् अर्थं लिखत-

1. बुद्धिमान् – inteligent
2. इन्द्रियम् – sense organ
3. अतिथिः – guest
4. भृत्यः – attender
5. जगत् – world
6. अग्निः – fire
7. सोमः – moon
8. वायुः – wind

### II. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. जीवति – लट् – प्रथमपुरुषः, एकवचनम् of जीव् to live
2. निपतति – लट् – प्रथमपुरुषः, एकवचनम् of पत् with नि to fall
3. शोचन्ति – लट् – प्रथमपुरुषः, बहुवचनम् of शुच् to think
4. लभते – लट् – आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of लभ् to attain
5. जयति – लट् – प्रथमपुरुषः, एकवचनम् of जय् to win
6. भवति – लट् – प्रथमपुरुषः, एकवचनम् of भव् to be

### III. अधो लिखितानां पदानां विग्रहं लिखत-

1. बुद्धिमान् - ______________________
2. अतिथिः - ______________________
3. राजेन्द्रः - ______________________
4. सर्वभूतानाम् - ______________________
5. गवामृतम् - ______________________
6. कार्यकरः - ______________________
7. धर्मरतः - ______________________



Unit 5.indd 35 06-06-2018 12:40:17

## IV. यथोचितं सन्धिम् अथवा विच्छेदं कुरुत -

| | | |
|---|---|---|
| 1. आत्मनश्च | – | आत्मनः + च |
| 2. कोऽतिथिः | – | कः + अतिथिः |
| 3. सर्वमिदम् | – | सर्वम् + इदं |
| 4. कश्च | – | कः + च |
| 5. सद्भिर्न | – | सद्भिः + न |
| 6. सन्धिर्न | – | सन्धिः + न |
| 7. कार्यकरोऽधिकम् | – | कार्यकरः+ अधिकम् |
| 8. यश्च | – | यः + च |

## V. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. बुद्धिमान् – धीमान्
2. भृत्यः – सेवकः
3. जगत् – विश्वम्
4. अग्निः – वह्निः
5. सोमः – इन्दुः, चन्द्रः
6. वायुः – अनिलः, मरुत्, पवनः
7. आनृशंस्यम् – दया, कृपा
8. मित्रम् – सुहृत्

## VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. धर्मः × अधर्मः
2. सद्भिः × असद्भिः
3. बहु × अल्पम्
4. बुद्धिमान् × मूढः
5. सुखम् x दुःखम्
6. प्रियम् x अप्रियम्
7. जीवनम् x मरणम्
8. अमृतम् x विषम्

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. यक्षप्रश्नः इति पाठ्यांशः कुतः स्वीकृतः ?
2. कः न जीवति ?
3. सर्वभूतानाम् अतिथिः कः ?
4. परलोके कः धर्मः ?
5. कः धर्मः सदाफलः ?
6. कैः सन्धिः न जीर्यते ?



Unit 5.indd 36 06-06-2018 12:40:17

7. प्रियवचनवादी किं लभते ?

8. धर्मे रतः किं लभते ?

## VIII. विस्तरेण उत्तरत-

1. यक्ष-युधिष्ठिरयोः संवादं यथाग्रन्थं लिखत।

.........................................................

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

यक्षप्रश्नवत् श्रीआदिशङ्करभगवत्पादैः विरचितायां प्रश्नोत्तररत्नमालिकायां अपि प्रश्नोत्तररूपेण संवादः वर्णितः अस्ति। अत्र श्रीभगवत्पादाः शिष्योक्तानां प्रश्नानां समीचीनानि उत्तराणि ददति । अत्र कानिचन उदाह्रियन्ते-

भगवन् किं उपादेयं? गुरुवचनं, हेयमपि च किम् ? अकार्यम् ।

कः गुरुः? अधिगततत्वः शिष्यहिताय उद्यतः सततम्।।

कः पथ्यतरः? धर्मः, कः शुचिरिह? यस्य मानसं शुद्धम् ।

कः पण्डितः? विवेकी, किं विषं? अवधीरणा गुरुषु ।।

कः अन्धः? यः अकार्यरतः, कः बधिरः? यो हितानि न श्रुणोति।

कः मूकः? यो काले हितानि वक्तुं न जानाति ।।

### Weblinks :

1. https://hi.in.wikipedia.org/wiki/यक्षप्रश्न
2. https://sa.in.wikipedia.org/wiki/महाभारतम्



Unit 5.indd 37 06-06-2018 12:40:17

षष्ठः पाठः

# 6 Lesson – 6

# धीरश्चोरः

संस्कृतवाङ्मये नीतिबोधकाः अनेके कथाग्रन्थाः सन्ति । तेषु पञ्चतन्त्रम्, हितोपदेशः इत्यादयः सुप्रसिद्धाः । संस्कृतभाषायाः प्रथमशिक्षणे कथाग्रन्थाः महदुपयोगकराः वर्तन्ते । अस्यां कथायां भुक्कुण्डस्य प्रत्युत्पन्नमतित्वं, राज्ञः कवितावात्सल्यम् इत्यादयः सुष्ठु निरूपिताः सन्ति ।

पुरा धारानगरे भुक्कुण्डो नाम कश्चित् कृतविद्यो धीरश्चोरो बभूव । स कस्याञ्चित् रात्रौ कस्यचित् वणिजः सदनं प्रविश्य महार्घाणि भूषणानि चोरयित्वा गृहं प्रति न्यवर्तत। निभृतं सः नगरमार्गे निर्गच्छन् आरक्षकैः लक्षितो गृहीतश्च ।

अन्येद्युः प्रातरेव तं निगडितपादं ते राजान्तिकं निन्युः । राजा च तम् अवलोक्य - कोऽयम् ? इति आरक्षकान् अपृच्छत् । आरक्षका आहुः –'देव! कुम्भीलकोऽयम् अतीतायां रात्रौ मणिकारवीथ्यां कस्यचित् वणिजः वसतिं प्रविश्य भूषणानि चोरयित्वा गच्छन् अस्माभिः गृहीतः आनीतश्च । श्रुत्वा देवः प्रमाणम्' - इति । तेषां वचः श्रुत्वा राजा कुम्भीलकमपृच्छत् – रे! अपि सत्यं यदेते कथयन्ति'? भुक्कुण्डः तावदात्मनः कृत्यं निह्नोतुम् अशक्नुवन् क्षणं तूष्णीम् आस्त। भूयः पृष्टः सः - `देव! प्रसीद । अहम् अतीव दरिद्रोऽस्मि । चौर्येणैव मया जीवनं क्रियते, क्षम्यताम्' - इत्यवदत्। तच्छ्रुत्वा कुपितः राजा वधदण्डम् आदिष्टवान् ।।



सुधीः भुक्कुण्डः अतिकठिनाम् इमां राजाज्ञां श्रुत्वा भृशं व्याकुलीभूतोऽपि स्वकवितया दण्डात् आत्मानं मोचयितुमिच्छन् कविषु राज्ञः परमं वात्सल्यं जानानः प्रत्युत्पन्नमतिः निर्भीकः प्राह –

'भट्टिर्नष्टो भारविस्सोऽपि नष्टो
भिक्षुर्नष्टो भीमसेनोऽपि नष्टः ।



Unit 6.indd 38 06-06-2018 12:41:11

भुक्कुण्डोऽहं भूपतिस्त्वं च राजन्

भभावल्यामन्तकः सन्निविष्टः ।। इति ।

तदाकर्ण्य कविवत्सलः राजा – भो भुक्कुण्ड ! दण्डार्होऽपि त्वं सुकविरासीः इति मया क्षम्यसे । इतः परम् ईदृशं कर्म मा कुरु' इत्युक्त्वा तेन गृहीतं सर्वं धनं तत्तत्स्वामिभ्यः प्रत्यर्प्य स्वदत्तेन प्रभूतेन वित्तेन तं सम्भावयामास । भुक्कुण्डोऽपि तदारभ्य त्यक्तचौर्यः राज्ञः प्रीतेः पात्रीभूतः सपुत्रकलत्रः सुखम् उवास ।

## अभ्यासः

### I. अधो दत्तानाम् शब्दानाम् अर्थं लिखत-

1. कृतविद्यः – educated
2. सदनम् – house
3. महार्घाणि – precious
4. भूषणानि – ornaments
5. निभृतम् – silently
6. आरक्षकाः – soldiers
8. कृत्यम् – action
9. क्षणम् – moment
10. दरिद्रः – poor
12. वसतिः – House
13. वणिजः – merchants
14. भृशम् – very much
15. वधदण्डम् – death sentence

### II. कः कं प्रति अवदत् इति लिखत–

| | | कः | कम् |
|---|---|---|---|
| 1. कोऽयम्? | – | _______ | _______ |
| 2. श्रुत्वा देवः प्रमाणम् | – | _______ | _______ |
| 3. अहम् अतीव दरिद्रोऽस्मि | – | _______ | _______ |
| 4. इतः परम् ईदृशं कर्म मा कुरु | – | _______ | _______ |
| 5. रे! अपि सत्यं यदेते कथयन्ति | – | _______ | _______ |



Unit 6.indd 39 06-06-2018 12:41:11

## III. रिक्तस्थानानि पूरयत-

1. _______भुक्कुण्डो नाम चोरः बभूव ।
2. सः नगरमार्गे निर्गच्छन् __________ गृहीतः ।
3. राजा _______अपृच्छत् ।
4. अहम् अतीव _________ अस्मि ।
5. तच्छ्रुत्वा कुपितः राजा ________ आदिष्टवान् ।

## IV. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. धारानगरे कीदृशः चोरः बभूव?
2. कः आरक्षकैः गृहीतः?
3. राजा आरक्षकान् किम् अपृच्छत्?
4. आरक्षकाः किम् आहुः?
5. कः तूष्णीम् आस्त?
6. कुपितः राजा किम् अकरोत्?
7. भुक्कुण्डेन रचितं श्लोकं लिखत।
8. राजा भुक्कुण्डं केन सम्भावयामास?

## V. विस्तरेण उत्तरत-

1. धीरश्चोरः इति कथां संक्षिप्य लिखत।



Unit 6.indd 40 06-06-2018 12:41:11

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### कविपरिचयः -

भोजप्रबन्धस्य रचयिता कविः वल्लालदेवः ।

एष काशीनिवासी विद्वान् आसीत्।

### भोजप्रबन्धः -

भोजप्रबन्धः संस्कृतसाहित्यस्य एकम् अनुपम् ग्रन्थरत्नम् भवति ।

गद्यपद्यात्मके अस्मिन् प्रबन्धे अवतरणिकावर्जं पञ्चाशीति-कथाः विद्यन्ते ।

### भोजप्रबन्धात् कतिपयाः प्रसिद्धाः श्लोकाः -

अद्य धारा निराधारा
निरालम्बा सरस्वती ।
पण्डिताः खण्डिताः सर्वे
भोजराजे दिवं गते ।

अद्य धारा सदाधारा
सदालम्बा सरस्वती।
पण्डिता मण्डिता सर्वे
भोजराजे धरां गते ।।

### Weblinks :

1. www.Sangatham.com
2. https://fairytaler.com/a_clever_theif
3. https://www.scribd.com/doc/Panchatantra



Unit 6.indd 41 06-06-2018 12:41:12

## व्याकरण–अभ्यासः - 3

### (i) अजन्तनपुंसकलिङ्गशब्दाः

#### अकारान्तः नपुंसकलिङ्गः फल शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| सम्बोधन-प्रथमा | हे फल ! | हे फले ! | हे फलानि ! |

#### अकारान्तः नपुंसकलिङ्गः मित्र शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मित्रम् | मित्रे | मित्राणि |
| द्वितीया | मित्रम् | मित्रे | मित्राणि |
| तृतीया | मित्रेण | मित्राभ्याम् | मित्रैः |
| चतुर्थी | मित्राय | मित्राभ्याम् | मित्रेभ्यः |
| पञ्चमी | मित्रात् | मित्राभ्याम् | मित्रेभ्यः |
| षष्ठी | मित्रस्य | मित्रयोः | मित्राणाम् |
| सप्तमी | मित्रे | मित्रयोः | मित्रेषु |
| सम्बोधन-प्रथमा | हे मित्र ! | हे मित्रे ! | हे मित्राणि ! |



Unit 6.indd 42 06-06-2018 12:41:12

## इकारान्तः नपुंसकलिङ्गः वारि शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| सम्बोधन-प्रथमा | हे वारे !, हे वारि ! | हे वारिणी ! | हे वारीणि ! |

## उकारान्तः नपुंसकलिङ्गः मधु शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| सम्बोधन-प्रथमा | हे मधो !, हे मधु ! | हे मधुनी ! | हे मधूनि ! |



Unit 6.indd 43 06-06-2018 12:41:12

## अनुच्छेदलेखनम् – 3

### (Comprehension – 3)

पुरा भगवान् वेदव्यासः महाभारतं नाम इतिहासं कर्तुं स्वेन रचितानां श्लोकानां लेखनार्थं गणेशं प्रार्थयामास। सोऽपि स्वमुखात् एकं दन्तं उद्धृत्य तं लेखनीवत् उपयुयोज। श्लोकांश्च अविच्छेदेन अलिखत् । अनेन हेतुना गणपतिः एकदन्तः इति अपरं नाम अवाप । सः मुहुर्मुहुः "पश्चात् कथय कथय" इति व्यासं त्वरयामास । तेन खिन्नः व्यासः "मम श्लोकानाम् अर्थम् अविज्ञाय भवता विलेखनं न कर्तव्यम्" इति गजाननम् उवाच । तदा काञ्चन गूढार्थान् श्लोकान् कथमास। यावत् विघ्नेश्वरः तेषाम् अर्थं विचिन्तयन् आसीत्, तावत् वेदव्यासः श्रमं विना अपरान् श्लोकान् रचयमास । एवम् उभाभ्यामपि विश्रान्तिः लब्धा ।



### प्रश्नाः

1. वेदव्यासः किम् इतिहासं लिखितवान् ?
2. वेदव्यासः श्लोकानां लेखनार्थं कं प्रार्थयामास?
3. गणपतेः अपरं नाम किम्?
4. व्यासः कीदृशान् श्लोकान् कथयामास?
5. उभाभ्यामपि का लब्धा?

## अनुवादः – 3

### (Translation – 3)

अवन्तिदेशस्य राजधान्याम् उज्जयिन्यां विक्रमादित्यो नाम धार्मिकः महीपालः शशास। एकदा तस्य भूपतेः धार्मिकतां परीक्षितुं कामधेनोः दुहिता सुरभिः देवलोकात् महीम् आजगाम। आगत्य च, विक्रमस्य आगमनमार्गे कुत्रचित् महती पङ्के निमग्ना सा, परमं विषादम् अनुभवन्तीव तस्थौ। नृपतिश्च तस्याः दुरवस्थाम् अवलोक्य, दयार्द्रः बभूव। सद्यः एव सः स्वसुखम् अविचिन्त्य, पङ्कम् अवगाह्य, तां गां पङ्कात् उद्धृत्य, बहिः अनयत्। अथ, तां शुद्धजलैः प्रक्षाल्य, प्रीत्या तस्यै घासमुष्टीश्च दत्वा, तां बहुधा समुपाचरत्। तेन नितरां प्रसन्ना सा दिव्यधेनुका, तदीया भूत्वा, राजगृहे एव सुचिरं सुखं न्यवसत्।।



Unit 6.indd 44 06-06-2018 12:41:12

सप्तमः पाठः

7

Lesson – 7

# जीवेम शरदः शतम्

अस्मिन् पाठे चरकवाग्भटादिभिः उक्ताः आरोग्यसंबन्धिनियमाः संगृहीताः सन्ति। तत्र आद्यः श्लोकः योगवार्तिकात्, द्वितीय-तृतीय-चतुर्थ-श्लोकाः अष्टाङ्गहृदयात्, पञ्चम-षष्ठ-सप्तम-श्लोकाः वैद्यकीय-सुभाषितसाहित्यात्, अष्टम–नवम-दशम श्लोकाः श्रीमद्भगवद्गीतायाश्च सङ्गृहीताः सन्ति ।

जीवने सुखशान्त्यादीनां प्राप्तिः आरोग्यसंरक्षणेनैव साध्या । ‘ शरीरमाद्यं खलु धर्मसाधनम् ‘ इति कालिदासवचनानुसारं अरोगतायै शरीररक्षणम् अत्यावश्यकम्। नियमयुक्तेन आहारसेवनेन, प्राणायाम-व्यायामादिना च देहः रोगैः विमुक्तो भवति। भगवद्गीतायाम् अपि “युक्ताहारविहारस्य” इत्यभिहितम् । अतः युक्ताहारविहारेण नियमितव्यायामेन च मानवः आरोग्यवान् भवति ।





## पातञ्जल्यम् -

योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन ।
योऽपाकरोत्तं प्रवरं मुनीनाम्
पतञ्जलिं प्राञ्जलिरानतोऽस्मि ।। 1

## प्रातरुत्थानम् -

ब्राह्मे मुहूर्ते उत्तिष्ठेत्स्वस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्वर्त्य कृतशौचविधिस्ततः ।। 2



Unit 7.indd 45 06-06-2018 12:41:38

## व्यायामः -

लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्मेधसः क्षयः ।
विभक्तघनगात्रत्वं व्यायामादुपजायते ।। 3

व्यायामपुष्टगात्रस्य बुद्धिस्तेजो यशो बलम् ।
प्रवर्धन्ते मनुष्यस्य तस्माद् व्यायाममाचरेत् ।। 4

## स्नानम् -

प्रातः स्नानं गवां सेवा आरामः पुष्पवाटिका ।
मातापित्रोश्च शुश्रूषा शास्त्राय च सुखाय च ।। 5

शुकवद्भाषणं कुर्यात्
बकवद्ध्यानमाचरेत् ।
अजवच्चर्वणं कुर्यात्
गजवत्स्नानमाचरेत् ।। 6

## भोजनम् / आहारः -

अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।
भोजने चामृतं वारि भोजनान्ते विषप्रदम् ।। 7

आयुस्सत्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ।। 8

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ।। 9

यातयामं गतरसं पूतिपर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ।। 10



Unit 7.indd 46 06-06-2018 12:41:38

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. वाचाम् – of the speech
2. प्रवरम् – great
3. स्वस्थः – healthy
4. निर्वर्त्य – having accomplished
5. मेधसः – of fat
6. तेजः – vigour
7. यशः – fame
8. शुश्रूषा – service
9. बकः – crane
10. सत्वं – good
11. चर्वणम् – chewing
12. रस्याः – juicy
13. स्निग्धाः – fatty
14. स्थिराः – substantial
15. कटुः – bitter
16. अम्लः – sour
17. तीक्ष्णः – pungent
18. रूक्षः – dry
19. आमयः – sickness
20. पूति – insipid
21. पर्युषितम् – putrid
22. वैद्यः – doctor

### II. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. वाचाम् – षष्ठीविभक्तिः, बहुवचनम् of वाक् शब्दः
2. निर्वर्त्य – ल्यबन्तम् अव्ययम् of वृत् with निर् to leave
3. प्रातः – Indeclinable (अव्ययम्), meaning morning
4. आचरेत् – विधिलिङ् - प्रथमपुरुषः, एकवचनम् of चर् with आ to follow
5. उत्तिष्ठेत् – विधिलिङ् - प्रथमपुरुषः, एकवचनम् of स्था(तिष्ठ्) with उत् to stand
6. अपाकरोत् – लङ् - प्रथमपुरुषः, एकवचनम् of कृ (कर्) with अप to remove



Unit 7.indd 47 06-06-2018 12:41:38

## III. अधो लिखितानां पदानां विग्रहं लिखत-

1. शरीरचिन्ताम् – ______________________
2. कृतशौचविधिः – ______________________
3. लाघवम् – ______________________
4. कर्मसामर्थ्यम् – ______________________
5. पुष्टगात्रम् – ______________________
6. शुश्रूषा – ______________________
7. भोजनान्ते – ______________________
8. सात्विकप्रियाः – ______________________
9. तामसप्रियम् – ______________________
10. दुःखशोकामयप्रदाः– ______________________

## IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. विधिस्ततः – विधिः + ततः
2. दीप्तोऽग्निः – दीप्तः + अग्निः
3. व्यायामादुपजायते – व्यायामात् + उपजायते
4. बुद्धिस्तेन – बुद्धिः + तेन
5. यशो बलम् – यशः + बलम्
6. मातापित्रोश्च – मातापित्रोः + च
7. अजवच्चर्वणं – अजवत् + चर्वणं
8. चामृतम् – च + अमृतम्
9. स्थिरा हृद्याः – स्थिराः + हृद्याः
10. अत्युष्णाः – अति + उष्णाः



Unit 7.indd 48 06-06-2018 12:41:38

11. राजसस्येष्टाः – राजसस्य + इष्टाः

12. उच्छिष्टमपि – उच्छिष्टम् + अपि

13. चामेध्यम् – च + अमेध्यम्

14. रक्षार्थमायुषः – रक्षार्थम् + आयुषः

## V. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. चित्तम् – चेतः, मनः
2. शरीरम् – देहः, कायः
3. अग्निः – अनलः, पावकः
4. बुद्धिः – मतिः, धीः
5. सुखम् – सन्तोषः, आनन्दः
6. गजः – हस्ती, वारणः
7. वारि – जलम्, उदकम्
8. भोजनम् – अशनम्, आहारः
9. आमयः – रोगः, व्याधिः
10. अमृतम् – पीयूषम् , सुधा

## VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. मलम् × विमलम्
2. स्वस्थः × अस्वस्थः
3. लाघवम् × गौरवम्
4. क्षयः × वृद्धिः
5. तेजः × निस्तेजः
6. यशः × अयशः
7. बलम् × दुर्बलम्
8. प्रातः × सायम्
9. अमृतम् × विषम्
10. उष्णम् × शीतम्

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. मुनीनां प्रवरः कः ?
2. ब्राह्मे मुहूर्ते किं कुर्यात् ?
3. व्यायामात् किम् उपजायते ?
4. किमर्थं व्यायामम् आचरेत् ?

5. "शास्त्राय च सुखाय च" – विवृणुत।

6. स्नानं कथम् आचरेत् ?

7. भोजनान्ते वारि कीदृशं भवति ?

8. सात्विकप्रियाः आहाराः कथं भवन्ति ?

9. राजस्येष्टाः आहाराः किं प्रयच्छन्ति ?

10. तामसप्रियं भोजनं किम् ?

## VIII. सविस्तरम् उत्तरं लिखत-

1. टिप्पणीं लिखत-

   i) व्यायामः

   ii) स्नानम्

2. आहारस्य विभागं वर्णयत।

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

कोऽरुक् भवति ? यो हितभुक्, मितभुक्, ऋतभुक् सोऽरुक् भवति ।।

आयुः कामयमानेन धर्मार्थसुखसाधनम्।
आयुर्वेदोपदेशेषु विधेयः परमादरः ।।

चरकः सुश्रुतश्चैव वाग्भट्श्च तथाऽपरः ।
मुख्याश्च संहिता वाच्यास्तिस्त्र एव युगे युगे ।।

रागादिरोगान् सततानुषक्तान्
अशेषकायप्रसृतानशेषान् ।
औत्सुक्यमोहारतिदाञ्जघान
योऽपूर्ववैद्याय नमोऽस्तु तस्मै ।।



Unit 7.indd 50 06-06-2018 12:41:38

## चरकस्य आहारनियमः -

चरकेण ऋत्वनुसारं सेवनासेवनयोग्यानां खाद्यपेयपदार्थानां वर्णनम् एवं कृतम् -

### हेमन्ते -

तस्मात्तुषारसमये स्निग्धाम्ललवणान् रसान् ।
गोरसानिक्षुविकृतीर्वसां तैलं नवौदनम् ।।

### शिशिरे -

कटुतिक्तकषायाणि, वातलानि लघूनि च ।
वर्जयेदन्नपानानि, शिशिरे शीतलानि च ।।

### वसन्ते -

तस्माद्वसन्ते कर्माणि, वमनादीनि कारयेत् ।
गुर्वम्लस्निग्धमधुरं, दिवास्वप्नं च वर्जयेत्।।

### ग्रीष्मे -

शीतं सशर्करं मन्थं जाङ्गलान् मृगपक्षिणः ।
घृतं पयः सशाल्यमन्नं भजन् ग्रीष्मे न सीदति ।

### वर्षायाम् -

वर्षास्वग्निबले क्षीणे, कुप्यन्ति पवनादयः ।
तस्मात् साधारणः सर्वो विधिर्वर्षासु राजते ।।

### शरदि -

तत्रान्नपानं मधुरं, लघुशीतं सतिक्तकम् ।
पित्तप्रशमनं सेव्यं मात्रया सुप्रकांक्षितैः ।।

## Weblinks :

1. https://vichaarsankalan.wordpress.com
2. WWW.gitasupersite.iitk.ac.in

अष्टमः पाठः

8

Lesson – 8

# हिमालयवर्णनम्

हिमालयः अस्माकं भारतस्य मकुटः भवति । अयं पर्वतः कृतयुगादारभ्य कलियुगपर्यन्तं स्थित्वा भारतस्य कीर्तिम् उत्पादयति। पुराणेष्वपि अस्य पर्वतस्य महिमा बहुधा वर्णितम् अस्ति। अस्मिन् पाठे अपि हिमालयस्य महिमाम् अधिकृत्य उक्तं भवति । अयं पाठ्यभागः महाकविकालिदासेन विरचितात् कुमारसंभवात् उद्घृत्य गद्यमयीकृतः । अस्मिन् पाठ्यभागे हिमालयस्य देवतात्वं, उत्कृष्टत्वं, औन्नत्यम् इत्यादयः विषयाः वर्णिताः सन्ति।



हिमालयः लोके सर्वोच्चः पर्वतः अस्ति । अयमेव विषयः महाकविकालिदासेन विरचिते कुमारसंभवे वर्णितं भवति ।





Unit 8.indd 52 06-06-2018 12:42:28

“अस्त्युत्तरस्यां दिशि देवतात्मा

हिमालयो नाम नगाधिराजः।

पूर्वापरौ वारिनिधीवगाह्य

स्थितः पृथिव्या इव मानदण्डः ।।

भारतस्य उत्तरस्यां दिशि हिमालयो नाम पर्वतः (नगः) वर्तते । सः पूर्वापरौ तोयनिधीवगाह्य स्थितः भारतस्य सीमां आपादयति। दैर्घ्येन, वैशाल्येन, औन्नत्येन च हिमालयः सर्वान् पर्वतान् अतिशेते। अतः अयं नगाधिराजः इति व्यपदिश्यते।

पुरा सर्वे शैलाः पृथुमहाराजेन उपदिष्टप्रकारेण हिमालयं वत्सं परिकल्प्य गोरूपभूमेः नानाविधरत्नानि महौषधयश्च दुहन्ति स्म । एतस्मात् कारणात् सर्वश्रेष्ठतमः शैलः हिमालयः इति प्रथा वर्तते । अयं शैलः सर्वदा हिमेन आवृतं भवति। यद्यपि हिमेन परिवृतस्यापि तस्य सौन्दर्यस्य न्यूनं न भवति । यथा चन्द्रस्य कलङ्कः दोषः न भवति, तथैव हिमालयस्यापि । उक्तं च महाकविकालिदासेन-

एको हि दोषो गुणसन्निपाते

निमज्जतीन्दोः किरणेष्विवाङ्कः ।।

अयं पर्वतः मेघात् अपि अत्युन्नतः वर्तते । हिमालस्य उन्नतशिखराणि एव सप्तर्षीणां वासस्थलानि इति कवयः वर्णयन्ति । निदाघकाले अत्र स्थिताः हिमाः विलीयमानाः वृष्टिरभावेऽपि गङ्गादि-नदीषु सर्वदा जलम् आपूरयन्ति। अतः हिमालयात् प्रवहन्त्यः नद्यः जीवनद्यः इति व्यवह्रियन्ते। हिमालयस्थाः तरवः लताश्च विविधान् औषधिपदार्थान् यच्छन्ति । हिमालयस्य गुहाः एव वनेचरणां गृहाणि भवन्ति। तेषु गृहेषु रात्रौ दीपाः न आवश्यकाः, यतः हिमालयस्य औषधीनां प्रभैव दीपरूपेण भवन्ति।

अपि च यागोपयोगीनि बहूनि वस्तूनि हिमालयात् एव प्राप्नुमः । अपि च अयं पर्वतः भूभारं वोढुं समर्थः भवति। भारतवर्षस्य सम्पत्समृद्धौ हिमालयः एव मुख्यः हेतुः ।

अत एव एनं देवतात्मा इति आकलयन्ति भारतीयाः। अपि च उक्तं महाकविकालिदासेन -

यावन्त्येतानि भूतानि स्थावराणि चराणि च।

मातरं कल्पयन्त्येनां ईशो हि जगतः पिता ।।



Unit 8.indd 53 06-06-2018 12:42:28

इति अनेन श्लोकेन शिवस्य विश्वगुरुत्वं सिद्ध्यति। तथा च -

अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।
सुता संबन्धविधिना भव विश्वगुरोर्गुरुः ।।

विश्वगुरोः परमेश्वरस्य गुरुत्वात् अस्य पर्वतस्य देवतात्वं सिद्ध्यति ।।

### कविपरिचयः-

अस्य पाठस्य कर्ता महाकविः कालिदासः । सः भोजराजस्य आस्थाने आसीत् ।

"पुरा कवीनां गणनाप्रसङ्गे
कनिष्ठिकाधिष्ठितकालिदासा ।
अद्यापि तत्तुल्यकवेरभावात्
अनामिका सार्थवती बभूव ।।

अनेन श्लोकेन अयं श्रेष्ठतमः कविः इति ज्ञायते । सः बहूनि काव्यानि अरचयत् । "उपमा कालिदासस्य" इति वाक्येन अयम् उपमालङ्कारवर्णने समर्थः इति ज्ञायते।।

## अभ्यासः

### I. कठिनशब्दार्थः-

| | |
|---|---|
| 1. पर्वतः – mountain | 2.उत्तरस्यां दिशि – in the northern direction |
| 3. नगाधिराजः – king of mountain | 4. मानदण्डः – measuring scale |
| 5. तोयनिधिः – ocean | 6. सीमा – boundary |
| 7. महौषधयः – great medicines | 8. परिवृतः – Surrounded by |
| 9. हिमः – snow | 10. सौन्दर्यम् – beauty |
| 11. न्यूनम् – less | 12. कलङ्कः – flow |
| 13. इन्दुः – moon | 14. उन्नतशिखरः – highest peak |
| 15. वासस्थलानि – living place | 16. निदाघकालः – Summer season |



Unit 8.indd 54 06-06-2018 12:42:28

17. वृष्टिः – rain

18. जीवनद्यः – perennial river

19. गुहाः – caves

20. वनेचराः – hunters

21. प्रभाः – lustres

22. विश्वगुरुः – father of entire world

## II. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. हिमालयः कुत्र अस्ति ?
2. हिमालयः कीदृशः पर्वतः ?
3. हिमालयः कीदृश इव स्थितः ?
4. हिमालयः केन सर्वान् पर्वतान् अतिशेते ?
5. हिमालयस्य अपरं नाम किम् ?
6. "निमज्जतीन्दोः किरणेष्विवाङ्कः" – वर्णयत।
7. हिमालयात् प्रवहन्त्यः नद्यः जीवनद्यः इति कथं व्यवह्रियन्ते ?
8. वनेचराणां गृहेषु रात्रौ दीपाः किमर्थं न आवश्यकाः ?
9. हिमालयः इति नाम कथम् अन्वर्थम् अभवत् ?
10. विश्वगुरुः कः ?

## III. सविस्तरम् उत्तरं लिखत -

1. हिमालयस्य महत्वं पाठानुसारं लिखत।
2. हिमालयस्य विश्वगुरोः गुरुत्वं कथं सम्पन्नम् इति विवृणुत।

## IV. मञ्जूषातः उचितं पदं चित्वा पूरयत-

नगाधिराजः, मानदण्डः, सीमां, महौषधयः, हिमेन

1. हिमालयः भारतस्य _________आपादयति।
2. भारतस्य उत्तरस्यां दिशि हिमालयो नाम ________ अस्ति ।



Unit 8.indd 55 06-06-2018 12:42:28

3. अयं गिरिः ________आवृतं भवति ।

4. हिमालयात् ______ प्राप्नुमः ।

5. अयं गिरिः पृथिव्याः ________ इव भवति ।

## V. अधो लिखितेषु समानार्थकपदं चित्वा लिखत-

1. पर्वतः _________ (गिरिः / भूमिः)

2. तोयम् _________ (जलं / क्षीरम्)

3. हिमम् ________ (तुषारः / अग्निः)

4. कलङ्कः ________ (दोषः / गुणः)

5. निदाघकालः _______ (ग्रीष्मः / वसन्तः)

## VI. उचितपदैः योजयत-

| | | |
|---|---|---|
| 1.पृथिवी | - | कुमारसंभवम् |
| 2. कालिदासः | - | गङ्गा |
| 3. शिवः | - | देवतात्मा |
| 4. जीवनदी | - | जगत्पिता |
| 5. हिमालयः | - | भूमिः |

## VII. कथयन्तु 'आम्' अथवा 'न' इति-

1. हिमालयः पूर्वस्यां दिशि वर्तते । ___________

2. हिमेन आवृतत्वात् हिमालयः इति नाम । ___________

3. हिमालये औषधिपदार्थाः न विद्यन्ते । ___________

4. अत्र गङ्गादि जीवनद्यः न प्रवहन्ति । ___________

5. हिमालयः विश्वगुरोः गुरुः इति व्यवह्रियते । ___________

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### पञ्च महाकाव्यानि-

| काव्यानि | रचयिता |
|---|---|
| रघुवंशम् | महाकविः कालिदासः |
| कुमारसंभवम् | महाकविः कालिदासः |
| किरातार्जुनीयम् | महाकविः भारविः |
| शिशुपालवधम् | महाकविः माघः |
| नैषधीयचरितम् | महाकविः श्रीहर्षः |

### कालिदासेन विरचितानि काव्यानि तेषां कथांशः च -

| | | |
|---|---|---|
| रघुवंशम् | - | सूर्यवंशस्य राज्ञां प्रभावः वर्णितः। |
| कुमारसम्भवम् | - | कुमारस्य (सुब्रह्मण्यस्य) जननम् उपवर्णितम्। |
| मेघसन्देशम् | - | नायिकानायकयोः मेघद्वारा कृतः सन्देशोऽभिवर्णितः। |
| ऋतुसंहारम् | - | षण्णां ऋतूणां वर्णनं कृतम्। |
| अभिज्ञानशाकुन्तलम् | - | शकुन्तला-दुष्यन्तयोः कथा उपवर्णिता। |
| मालविकाग्निमित्रम् | - | मालविका-अग्निमित्रयोः प्रेमकथा वर्णिता। |
| विक्रमोर्वशीयम् | - | विक्रम-ऊर्वश्योः कथा अभिवर्णिता। |

### Weblinks :

1. https://sa.in.wikipedia.org/wiki/हिमालयः
2. https://sa.in.wikipedia.org/wiki/कालिदासः



Unit 8.indd 57 06-06-2018 12:42:28

## व्याकरण–अभ्यासः - 4

### धातुः - परस्मैपदी - लृट् – (Future Tense)

#### वद् – to speak

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| मध्यमपुरुषः (II Person) | वदिष्यसि | वदिष्यथः | वदिष्यथ |
| उत्तमपुरुषः (III Person) | वदिष्यामि | वदिष्यावः | वदिष्यामः |

#### भव् – to be

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः (II Person) | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः (III Person) | भविष्यामि | भविष्यावः | भविष्यामः |

#### पठ् – to read

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः (II Person) | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः (III Person) | पठिष्यामि | पठिष्यावः | पठिष्यामः |



Unit 8.indd 58 06-06-2018 12:42:28

# अनुच्छेदलेखनम् – 4

## (Comprehension – 4)

धेनुः अस्माकं जननी इव । सा दुग्धं यच्छति । यदा मेघाः वारीणि वर्षन्ति तदा हरितानि तृणानि उद्भवन्ति । धेनवः सन्तुष्टाः च भवन्ति । धेनोः दुग्धं पौष्टिकं भवति । बालानां मतयः धेनोः दुग्धपानेन तीक्ष्णाः भवन्ति । जीवनस्य सफलतायै तीक्ष्णा मतिः आवश्यकी भवति। अतः वयं सर्वे धेनुं पालयामः आदरामश्च ।



### प्रश्नाः-

1. धेनुः किं यच्छति?
2. बालानां मतयः कथं तीक्ष्णाः भवन्ति?
3. धेनोः दुग्धं कथं भवति?
4. जीवनस्य सफलतायै का आवश्यकी?
5. अस्य गद्यांशस्य समुचितं शीर्षकं दीयताम्।

# अनुवादः – 4

## (Translation - 4)

कोऽपि मेषपालः स्वतनयं मेषैः सह प्रतिदिनं वनं प्रेषयामास। एकदा, काननं गतः सः दुष्टः बालः विनोदार्थं "व्याघ्रः, व्याघ्रः" इति उच्चैः आक्रोशत्। सपदि समीपस्थाः जनाः शस्त्राणि आदाय तत्समीपम् अधावन्। परन्तु तत्र कोऽपि व्याघ्रः न दृष्टः। बालकोऽपि वञ्चितान् तान् वीक्ष्य, पुनः पुनः अहसत्। तेऽपि बालस्य असत्यवाचा क्रुद्धाः यथागतं गताः। अथ अन्येद्युः सत्यमेव कश्चित् व्याघ्रः समायातः। तं दृष्ट्वा भीतः बालकः "व्याघ्रः, व्याघ्रः" इति दीनम् आक्रोशत्। 'अयं बालः पुनरपि मृषा आक्रोशति' इति मत्वा न कोऽपि बालकं रक्षितुम् आगतः। तेन, अरक्षितः बालकः व्याघ्रेण हतः। अतः, विनोदार्थमपि असत्यं न वक्तव्यम्।।

# नवमः पाठः 9

Lesson – 9

## सूक्तिसुधा

विश्वप्राचीनभाषासु पुरातना मधुरा मुख्या दिव्या अस्माकं संस्कृतभाषा। भारतीयसंस्कृतेः आधारसहिताः बहवः ग्रन्थाः संस्कृते सन्ति। यथा इतिहासौ, चत्वारः वेदाः, अष्टादश पुराणानि, पञ्चमहाकाव्यानि, आयुर्वेदः,धनुर्वेदः इत्यादयः। तेषु बहवः नीतयः मनुष्यं सुमार्गं नयन्ति। ततः अस्मिन् पाठ्यभागे केचन नीतयः प्रतिपाद्यन्ते।



### विद्याप्रशंसा -

न चोरहार्यं न च राजहार्यं

न भ्रातृभाज्यं न च भारकारि ।

व्यये कृते वर्धत एव नित्यं

विद्याधनं सर्वधनप्रधानम् ।। 1



Unit 9.indd 60 06-06-2018 12:43:26

**दानम् -**

कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम् ।। 2

**न्यायमार्गः -**

यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ।। 3

**मैत्री -**

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमुपैति पश्चात् ।
दिनस्य पूर्वार्ध-परार्ध-भिन्ना
छायेव मैत्री खलसज्जनानाम् ।। 4

**कर्म -**

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ।। 5

**कार्यसिद्धिः -**

मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत् ।
मन्त्रवत् रक्षयेत् गूढं कार्यसिद्धिं प्रकाशयेत् ।। 6

**जाग्रता -**

दुर्जनेन समं सख्यं वैरं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतो कृष्णायते करम् ।। 7

**गौरवम् -**

वस्त्रेण वपुषा वाचा विद्यया विनयेन च ।
वकारैः पञ्चभिर्युक्तः नरो भवति पूजितः ।। 8

## सुजन-दुर्जन-स्वभावः -

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम् ।। 9

## शीलप्रशंसा -

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ।। 10

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

| | | |
|---|---|---|
| 1. सुधा – nectar | 2. वपुः – body | 3. चोरः – thief |
| 4. भ्राता – brother | 5. तिर्यञ्चः – animals | 6. मैत्री – friendship |
| 7. विनयः – modesty | 8. धेनुः – cow | 9. वैरम् – enemity |
| 10. कीर्तिः – fame | 11. विदेशः – foreign | 12. मतिः – intellect |

### II.अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. करोति – लट् - प्रथमपुरुषः, एकवचनम् of कृ to do
2. यान्ति – लट् - प्रथमपुरुषः, बहुवचनम् of या to go
3. विमुञ्चति – लट् - प्रथमपुरुषः, एकवचनम् of मुञ्च् with वि to leave
4. दहति – लट् - प्रथमपुरुषः, एकवचनम् of दह् to burn
5. अस्ति – लट् - प्रथमपुरुषः, एकवचनम् of अस् to be
6. विन्दति – लट् - प्रथमपुरुषः, एकवचनम् of विन्द् to get



Unit 9.indd 62 06-06-2018 12:43:26

### III. अधो लिखितानां पदानां विग्रहं लिखत-

1. काव्यम् – ____________________
2. चोरहार्यम् – ____________________
3. महात्मनाम् – ____________________
4. अपन्थानम् – ____________________
5. मैत्री – ____________________
6. सज्जनानाम् – ____________________
7. खलसज्जनानाम् – ____________________
8. गौरवम् – ____________________
9. विद्याधनम् – ____________________

### IV. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. कर्णः + त्वचः = कर्णस्त्वचः
2. सोदरः + अपि = सोदरोऽपि
3. छाया + इव = छायेव
4. वा + अपि = वापि
5. मनसि + एकम् = मनस्येकम्
6. वचसि + एकम् = वचस्येकम्
7. कर्मणि + एकम् = कर्मण्येकम्
8. मनसि + अन्यत् = मनस्यन्यत्
9. वचसि + अन्यत् = वचस्यन्यत्
10. कर्मणि + अन्यत् = कर्मण्यन्यत्

### V. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. मनः – चित्तम्
2. भाषा – वाणी
3. चोरः – तस्करः, दस्युः
4. राजा – नृपः, भूपालः
5. भ्राता – सोदरः
6. जीमूतः – मेघः
7. मैत्री – सख्यम्
8. माता – जननी
9. धेनुः – गौः
10. वैरम् – शत्रुता, विरोधः

## VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. मोक्षः × बन्धः
2. कीर्तिः × अपकीर्तिः
3. महात्मनाम् × दुरात्मनाम्
4. न्यायः × अन्यायः
5. देयम् × अदेयम्
6. गुर्वी × लघ्वी
7. पूर्वार्धः× परार्धः
8. सख्यम् × वैरम्
9. उष्णः × शीतः
10. गौरवम् × अगौरवम्

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. सर्वधनप्रधानं किम्?
2. "नास्यदेयं महात्मनाम्" – विवृणुत।
3. न्यायप्रवृत्तस्य प्रयोजनं किम् ?
4. खलसज्जनानां मैत्री कीदृशी ?
5. कर्म कथं कर्तारम् अनुगच्छति ?
6. कदा कार्यसिद्धिं प्रकाशयेत् ?
7. दुर्जनेन किमर्थं सख्यं वैरं च न कारयेत् ?
8. पञ्च वकाराः के ?
9. सुजन-दुर्जनस्वभावं लिखत।
10. सर्वत्र धनं किम् ?

## VIII. सविस्तरम् उत्तरं लिखत-

1. टिप्पणीं लिखत-
   (i) कार्यसिद्धिः (ii) दानम् (iii) जाग्रता
2. व्याख्यात-
   (i) विद्या (ii) शीलम् (iii) गौरवम्
3. विवृणुत-
   (i) न्यायमार्गः (ii) कर्म (iii) सुजन-दुर्जनस्वभावः



Unit 9.indd 64 06-06-2018 12:43:26

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥

यस्मिन् जीवति जीवन्ति बहवः स तु जीवति ।
काकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम् ॥

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुविभारभूताः
मनुष्यरूपेण मृगाश्चरन्ति ।।

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

*Sir William Jones in his third annual address before the Asiatic Socieyt, Calcutta, on February 2, 1786 (Asiatic Researches, vol.1, 1788, pp.422 f):-

"The Sanskrit language, whatever be it antiquity is of a wonderful structure; more perfect than the Greek, more copious than the Latin and more exquisitely refined than either.

### Weblinks :

1. Sanskrit slokas.com
2. https://sa.in.wikisource.org/wiki/सुभाषितानि
3. https://sa.in.wikisource.org/wiki/भर्तृहरिः



Unit 9.indd 65 06-06-2018 12:43:26

# सङ्घकालीनसंस्कृतम्

इतिहासपुराणविषयाः सङ्घकालेषु जनैः बहुधा आदृताः आसन् । तत्कालीनकवयः श्रुतिस्मृतिपुराणेतिहासविषयान् स्वग्रन्थेषु तथैव, कुत्रचित् व्यत्ययेन च लिखित्वा अप्रचारयन् । तमिल्भाषाज्ञानेन सह संस्कृतभाषाज्ञानमपि संपाद्य संङ्घकवयः स्वकाव्येषु पौराणिकविषयान् कथम् उल्लिखितवन्तः इति अस्मिन् पाठे प्रदर्श्यते।



## वेदाः

पुरनानूरुग्रन्थे वेदानां, वेदाङ्गानां च विभागः, तेषां नित्यत्वम् अपौरुषेयत्वं च प्रतिपादितम्। पेरुम्पाणाट्रुप्पडै इति ग्रन्थे शुकाः अपि वेदवाक्यानि अब्रुवन् इत्यंशः दृश्यते । नट्टैयार् नाम कविः पुरनानूरु गाथायां कञ्चन पाण्ड्येशं नानाविधयागकर्तृत्वेन वर्णयति। एवं तत्रैव पेरुनर्किल्लि नाम चोलराजा राजसूययागम् अकरोत् इति अंशः वर्णितः । एतेन, श्रुतिस्मृतीतिहासपुराणादिषु प्रतिपादितं वैदिकमार्गं सङ्घकवयः सर्वात्मना अङ्गीकृत्य तान् विषयान् स्वीयग्रन्थेषु सुविशदं निरूप्य प्रचारम् अकुर्वन् ।

## व्याकरणम्

तोल्काप्पियग्रन्थे पाणिनीयशिक्षावत् वर्णानां स्थानानि निरूपितानि । एवं पदलक्षणम्, समासनिरूपणम्, विभक्तिविचारः, सूत्रलक्षणम् इत्यादयः विषयाः सङ्घकाव्येषु संस्कृतवाङ्मयम् इव साम्यत्वेन, कुत्रचित् स्वल्पेन व्यत्ययेन च दृश्यन्ते।



Unit 10.indd 66 06-06-2018 12:43:49

## रामायणम्

पुरनानूरुग्रन्थे कश्चित् कविः रामकथां किञ्चित् व्यत्ययेन वर्णयति। कश्चित् चोलराजा दरिद्राय कवये विविधानि आभरणानि पारितोषिकत्वेन प्रयच्छति। तदानीमेव आभरणदृष्टः कविः अङ्गुल्याभरणं कर्णयोः, कण्ठाभरणम् अङ्गुल्याम् इत्येवं व्यत्ययेन धारयति । एवं धारणं, रावणेनापहृतया सीतया पर्वते विसृष्टानि आभरणानि गृहीत्वा कपिभिः कृतमिव भाति इति हास्यरथार्थं कविः निर्दिशति ।

## महाभारतम्

दुर्योधनेन वञ्चनया जतुगृहे पञ्चपाण्डवान् निक्षिप्य तद्गृहं ददाह । तदा दग्धाद् गृहात् भीमः युधिष्ठिरादीन् स्वभ्रातृन् ततः बहिरानीय रक्षितवान् इति इयं कथा द्रविडकविना कलित्तोकैग्रन्थे उपवर्णिता दृश्यते ।।

एवं अहनानूरु, परिपाडल्, अगप्पाडल् इत्यादिषु सङ्घकाव्येषु श्रुतिस्मृतिपुराणेतिहासविषयाः परस्परविषयपरिवर्तनेन शोभन्ते ।

## अभ्यासः

### I. कठिनशब्दार्थः -

1. बहुधा – in many ways
2. नित्यत्वम् – eternity
3. शुकाः – parrots
4 सुविशदम् – explain well
5. दरिद्रः – poor
6. आभरणानि – ornament
7. पारितोषिकम् – gift
8. अङ्गुल्याभरणम् – ring
9. व्यत्ययः – different
10. कपिः – monkey
11. विसृष्टः – thrown
12 जतुगृहम् – lac house
13. ददाह – burnt
14. बहिः – outside

### II. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1.पुरनानूरु ग्रन्थे किं प्रतिपादितम् ?

2. पेरुम्पाणाट्रुप्पडै नाम ग्रन्थे के वेदवाक्यानि अब्रुवन् इत्यंशः दृश्यते ?

3. कः राजसूययागम् अकरोत् ?



Unit 10.indd 67 06-06-2018 12:43:49

4. चोलराजा कस्मै पारितोषिकं प्रयच्छति ?

5. दुर्योधनः वञ्चनया किं निर्मितवान् ?

6. सीता पर्वते कानि विसृष्टवती?

7. दग्धाद् गृहात् कः युधिष्ठिरादीन् रक्षितवान्?

## III. सविस्तरेण उत्तरं कुरुत-

1. सङ्घकाव्येषु वेदानां व्याकरणस्य च विषयाः कथं प्रतिपादिताः?

2. सङ्घकवयः स्वकाव्येषु रामायणस्य महाभारतस्य च विषयान् कथम् अवर्णयन् ?

## IV. आम् अथवा न इति लिखत –

1. इतिहासपुराणविषयाः सङ्घकालेषु जनैः बहुधा न आदृताः ________

2. पेरुनर्किल्लि नाम चोलराजा राजसूययागम् अकरोत् ________

3. पुरनानूरुग्रन्थे वेदानां नित्यत्वं अपौरुषेयत्वं च प्रतिपादितम् ________

4. तोल्काप्पियग्रन्थे पाणिनीयशिक्षावत् वर्णानां स्थानानि निरूपितानि ________

5. पुरनानूरुग्रन्थे रामकथा किञ्चित् व्यत्ययेन वर्णिता ________

## V. मञ्जूषातः पदानि चित्वा रिक्तस्थलानि पूरयत ।

| नट्टैयार्, पेरुनर्किल्लि, चोलराजा, जतुगृहं, भीमः |
|---|

1. ___________ नाम चोलराजा राजसूययागम् अकरोत् ।

2. ____ नाम कविः पुरनानूरुगाथायां पाण्ड्येशं नानाविधयागकर्तृत्वेन वर्णयति ।

3. _________ दरिद्राय कवये विविधानि आभरणानि पारितोषिकत्वेन प्रयच्छति ।

4. दुर्योधनेन वञ्चनया ______ पञ्चपाण्डवान् निक्षिप्य तद्गृहं ददाह।

5. दग्धाद् गृहात् ___________ स्वभ्रातॄन् रक्षितवान् ।



Unit 10.indd 68 06-06-2018 12:43:49

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### पुरनानूरु 166 गाथा (26-1-4) -

நன்றாய்ந்த நீணிமிர் சடை முது முதல் வன்வாய்போகா-
தொன்று புரிந்த வீரிரண்டின் ஆறுணர்ந்த வொருமுது நூல்

### पेरुम्पाणाट्रुप्पडै 300 – 301 -

வளைவாய்க்கிள்ளை மறைவிளி பயிற்றும்............

### पुरनानूरु 15 गाथायां 17-21
### कञ्चन पाण्ड्येशम् -

நற்பனுவனால் வேத்ததருஞ்சீர்த்திப்
பெருங்கண்ணுறை .......பலகொல்

### पुरनानूरु – 367 गाथा 4 – 13
### पेरुनर्किल्लि -

ஏற்ற பார்ப்பார்க் கீர்ங்கை நிறையப்
பூவும் பொன்னும் புனல்படச் சொரிந்து
. . . . . . . . . . புரையக் காண்டக விருந்த

### पाणिनीयशिक्षा -

अष्टौ स्थानानि वर्णानाम् उरः कण्ठः शिरस्तथा ।
जिह्वा मूलम् च दन्ताश्च नासिकोष्ठौ च तालु च ।।

### तोल्काप्पियम् -
### எழுத்து பிறப்பியல் 3-11 அதிகாரம்

“உந்தி முதலா முந்துவளி தோன்றித்
தலையினும் மிடற்றினும் நெஞ்சினும் நிலைஇப்
பல்லும் இதழும் நாவும் மூக்கும்
அண்ணமும் உள்பட எண் முறை நிலையான்”

### पदलक्षणम् -
### निरुक्तम् -

चत्वारि पदजातानि नाम आख्यात उपसर्ग निपातानि इति
இயற்சொல், திரிசொல், திசைச் சொல், வடசொல்லென்று
அனைத்தே செய்யுள் ஈட்டச் சொல்லே.



Unit 10.indd 69 06-06-2018 12:43:49

## समासाः -

इह कश्चित् समासः पूर्वपदार्थप्रधानः
कश्चित् उत्तरपदार्थप्रधानः ।
कश्चित् अन्यपदार्थ प्रधानः
कश्चित् उभयपदार्थप्रधानः ।। (पतञ्जलि-भाष्यम्)

முன்மொழி நிலையலும் பின்மொழி நிலையலும்,
இரு மொழி மேலும் ஒருங்குடன் நிலையிலும்,
அம்மொழி நிலையாது அன் மொழி நிலையிலும்
அந் நான்தென்ப பொருள் நிலை மரபே
சொல்.எச்ச. இயல் 23

## सूत्रलक्षणम्

अल्पाक्षरं असन्दिग्धं सारवत् विश्वतो मुखम्
अस्तोभं अनवद्यं च सूत्रं सूत्रविदो विदुः ।।
மேற்கிளந்தெடுத்த யாப்பினுட் பொருளொடு
சில் வகையெழுத்தின் செய்யுட்டாகிச்
சொல்லுங்காலை உரையகத் தடக்கி,
நுண்மையொடு புணர்ந்த வொண்மைத்தாகித்
துளக்கலாகாத் திணைமையெய்தி
அடக்கலாகா அரும் பொருட்டாகிப்
பல் வகையானும் பயன் தெரிபுடையது
சூத்திரத்தியல்யென யாத்தனர் புலவர் (மரபு 102)

## रामायणम्

கடுத்தெறலி ராமனுடன் புணர் சீதையை
வலித்தகையரக்கன் வெளவிய ஞான்றை
நிலஞ்சேர் மதரணி கண்ட குரங்கின்
செம்முகப் பெருங்கிளையிழப்பொலிந்தா அங்கு
(புறநானூறு 378 गाथा 18-21)

## महाभारतम्

வயக்குறு மண்புலம் வடமொழிப் பெயர் பெற்ற
முகத்தவன் மக்களுள் முதியவன் புணர்பினால்
ஐவரென்றுலகேத்தும் அரசர்கள் அகத்தராக்
கைபுனையரக்கில்லைக் கதழெரி சூழ்ந்தாங்கு
(கலித்தொகை பா.25, வரி 1- 4)

Weblink : 1. ta.vikaspedia.in/education



Unit 10.indd 70 06-06-2018 12:43:49

## व्याकरण–अभ्यासः - 5

### धातुः - आत्मनेपदी - लट् – (Present Tense)

### सेव् – to serve

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | सेवते | सेवेते | सेवन्ते |
| मध्यमपुरुषः (II Person) | सेवसे | सेवेथे | सेवध्वे |
| उत्तमपुरुषः (III Person) | सेवे | सेवावहे | सेवामहे |

### यत् – to try

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | यतते | यतेते | यतन्ते |
| मध्यमपुरुषः (II Person) | यतसे | यतेथे | यतध्वे |
| उत्तमपुरुषः (III Person) | यते | यतावहे | यतामहे |

### मुद् (मोद्) – to please

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | मोदते | मोदेते | मोदन्ते |
| मध्यमपुरुषः (II Person) | मोदसे | मोदेथे | मोदध्वे |
| उत्तमपुरुषः (III Person) | मोदे | मोदावहे | मोदामहे |



Unit 10.indd 71 06-06-2018 12:43:49

# अनुच्छेदलेखनम् – 5

## (Comprehension – 5)



एकदा भगवान् बोधिसत्वः बहुजन्मार्जितपुण्यफलैः शिवी नाम राजा बभूव। सः बाल्यादेव वृद्धोपसेवी विनयशीलः शास्त्रपारङ्गतः च आसीत् । जनकल्यानकर्मसु रतोऽसौ पुत्रवत् प्रजाः पालयति स्म । कारुण्य-औदार्यादि सद्‌गुणोपेतः सः नगरस्य समन्ततः धनधान्यसमृद्धाः दानशालाः अकारयत् । तत्र अर्थिनां समूहः अन्नपान-वसन-रजत-सुवर्णादिकम् अभीष्टं वस्तुजातं प्राप्य सन्तुष्टः अभवत् । राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशं आयान्ति स्म ।।

### प्रश्नाः-

1. राजा कदा आरभ्य विनयशीलः आसीत् ?
2. राजा प्रजाः कथं पालयति स्म?
3. कस्य समन्तात् राजा दानशालाः अकारयत् ?
4. अर्थिनां समूहः वस्तुजातं प्राप्य कथं अभवत्?
5. राज्ञः कां आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म?

# अनुवादः – 5

## (Translation - 5)

अञ्जनादेव्याः वायोश्च आत्मजः महाकपिः आञ्जनेयः, उद्यन्तं भानुं दृष्ट्वा, "फलम् इदम्" इति च मत्वा, तं ग्रहीतुं व्योम्नि उत्पपात। तं विलोक्य भीतानि सर्वाणि भूतानि महेन्द्रं शरणं प्रापुः। सोऽपि वज्रेण मारुतेः कपोले ताडयामास। बलवत् आहतः आञ्जनेयः धरण्यां वेगेन पपात। तेन संपातेन तस्य इतरः कपोलश्च ताडितः आसीत्। अतः, तस्य हनुः दीर्घा समजायत। तदाप्रभृति सः हनुमान् (हनूमान्) इति जगति विख्यातः बभूव।।

एकादशः पाठः 11

Lesson – 11

# राजधर्मः

अयं पाठ्यभागः 'यादवाभ्युदयम्' इति ग्रन्थात् स्वीकृतः । अस्य प्रणेता श्रीवेदान्तदेशिकः। अयं ग्रन्थः कृष्णस्य चरितं वर्णयति। ग्रन्थोऽयं चतुर्विंशतिसर्गात्मकः भवति । अत्र (अस्मिन् पाठ्यभागे) चन्द्रवंशोत्पन्नानां केषाञ्चन राज्ञां चरितं वर्णितमस्ति।

## नहुषः-



बभूव नहुषः तस्मिन्, ऐरावत इवाम्बुधौ ।
यमिन्द्रविगमे देवाः, पदे तस्य न्यवीविशन् ॥ 1

नरेन्द्राः पृथिवीचक्रे, नामचिह्नैरलङ्कृताः ।
जङ्गमास्तस्य वीरस्य, जयस्तम्भा इवाभवन् ॥ 2

शक्तिरप्रतिघा तस्य, शात्रवैरपि तुष्टुवे ।
यथावत् साधकस्येव, यावदर्था सरस्वती ॥ 3

## ययातिः-



वीरो रस इवोत्साहात्, नहुषादभ्यजायत ।
ययातिर्नाम येनैन्द्रं, अर्धासनमधिष्ठितम् ॥ 4

तटाकमिव तापार्ताः, तमिन्द्रमिव निर्जराः ।
भावा इव रसं भव्याः, पार्थिवाः पर्युपासत ॥ 5

## यदुः-

यदुर्नाम ततो जज्ञे, यत्सन्ततिसमुद्भवैः ।
समानगणनालेख्ये, निस्समानैर्निषिध्यते ॥ 6



Unit 11.indd 73 06-06-2018 12:44:22

अपुनः प्रार्थनीयस्य, प्रार्थिताधिकदायिनः ।
अर्थिनः प्रथमे तस्य, चरमान् पर्यपूरयन् ।। 7

शराणां शात्रवाणां च, सन्धानेन महौजसः ।
तस्य निर्धूतलक्षेण, द्विःक्वचिन्नाप्यभूयत ।। 8

युक्तदण्डममित्राणां, कृतान्तं समवर्तिनम् ।
दक्षिणं लोकपालं तं, अमन्यन्त दिवौकसः ।। 9



यशः प्रसूनसुरभिः, यदुसन्तानपादपः ।
बभूव विबुधप्रीत्यै, बहुशाखः क्षमातले ।। 10

- यादवाभ्युदये प्रथमः सर्गः

कविपरिचयः- 'यादवाभ्युदयम्' इति ग्रन्थः श्रीवेदान्तदेशिकेन प्रणीतः । अस्य पिता अनन्तसूरि नामकः, माता च तोताम्बा नाम्नी । अस्य जन्म काञ्चीपूरे ई.1268 वर्षे बभूव । अयं स्वमातुलस्य आत्रेय-रामानुजस्य सकाशे अध्ययनं कृतवान्। अनेन शताधिकतमाः ग्रन्थाः विरचिताः । अनेन कवितार्किकसिंहः इत्यादीनि बिरुदानि प्राप्तानि ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. अम्बुधौ – in milky ocean
2. नरेन्द्राः, पार्थिवाः – kings
3. अलङ्कृताः – decorated
4. चिह्नैः – by identification marks
5. स्तम्भाः – pillars
6. शक्तिः – strength
7. शात्रवैः – by the enemies
8. तटाकम् – pond
9. तापार्ताः – heat
10. निर्जराः, दिवौकसः – gods
11. पादपः – tree
12. आलेख्ये – in the picture
13. अर्थिनः – beggars
14. शराणाम् – of arrows
15. अमित्राणाम् – of enemies
16. दिवौकसः – gods



Unit 11.indd 74 06-06-2018 12:44:22

## II.अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. बभूव – लिट् – प्रथमपुरुषः, एकवचनम्  of भू to be
2. तस्मिन् – सप्तमी विभक्तिः, एकवचनम् of तद् (पुं) शब्दः
3. अभवन् – लङ् - प्रथमपुरुषः, बहुवचनम् of भू to be
4. अजायत – लङ् - प्रथमपुरुषः, एकवचनम् of जन् (जा) to took birth
5. जज्ञे – लिट् - प्रथमपुरुषः, एकवचनम् of जन् (जा) to took birth
6. प्रत्युवाच – लिट् - प्रथमपुरुषः, एकवचनम् of वद् with प्रति to reply
7. अभूयत – लङ् - प्रथमपुरुषः, एकवचनम् of भू to be
8. अमन्यन्त – कर्मणि लङ् - प्रथमपुरुषः, बहुवचनम् of मन् to think

## III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

1. इवाम्बुधौ = इव + अम्बुधौ
2. चिह्नैरलंकृताः = चिह्नैः + अलंकृताः
3. जङ्गमास्तस्य = जङ्गमाः + तस्य
4. इवाभवन् = इव + अभवन्
5. शक्तिरप्रतिघा = शक्तिः + अप्रतिघा
6. शात्रवैरपि = शात्रवैः + अपि
7. ययातिर्नाम = ययातिः + नाम
8. तटाकमिव = तटाकम् + इव
9. अप्यभूयत = अपि + अभूयत
10. पर्युपासत = परि + उपासत

## IV. अधो लिखितानां पदानां विग्रहं लिखत-

1. इन्द्रविगमे – ________________
2. पृथिवीचक्रे – ________________
3. अप्रतिघा – ________________
4. निर्जराः – ________________
5. अर्धासनम् – ________________
6. अपुनः – ________________
7. महौजसः – ________________
8. दिवौकसः – ________________
9. विबुधप्रीत्यै – ________________



Unit 11.indd 75 06-06-2018 12:44:22

## V. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. अम्बुधौ – सागरे
2. पदे – स्थाने
3. नरेन्द्राः – राजानः
4. अलङ्कृताः– विभूषिताः
5. शक्तिः – बलम्
6. शात्रवैः – रिपुभिः
7. तटाकम् – जलाशयम्
8. निर्जराः – देवाः
9. आलेख्ये – चित्रे
10. अर्थिनः – याचकान्
11. शराणाम् – बाणानाम्
12. पादपः – तरुः

## VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. देवाः x असुराः
2. शक्तिः x अशक्तिः
3. अप्रतिघा x प्रतिघा
4. शात्रवैः x मित्रैः
5. निस्समानैः x समानैः
6. अमित्राणाम् x मित्राणाम्
7. दक्षिणम् x वामम्
8. यशः x अयशः
9. सुरभिः x असुरभिः
10. प्रीत्यै x अप्रीत्यै

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. नहुषः कथं बभूव ?
2. नहुषस्य वीरं वर्णयत।
3. नहुषः शात्रवैः कथं तुष्टुवे ?
4. ययातिः कथम् अभ्यजायत ?
5. पार्थिवाः ययातिं कथं पर्युपासत ?
6. यदोः जन्म कथम् अभवत् ?
7. यदोः दानशीलता कथम् आसीत् ?
8. यदौः शौर्यं कीदृशम् ?
9. देवाः यदुं किमिति अमन्यन्त ?
10. यदुसन्तानपादपः क्षमातले किमर्थं बभूव ?



Unit 11.indd 76 06-06-2018 12:44:22

## VIII. सविस्तरम् उत्तरं लिखत-

1. नहुषस्य ययातेः च महत्वं लिखत।

2. यदुमहाराजं यथाग्रन्थं वर्णयत।

## IX. श्लोकान् आधृत्य रिक्तस्थानानि पूरयत-

1. बभूव नहुषः तस्मिन् ________ इवाम्बुधौ।
2. यथावत् साधकस्येव, यावदर्था _______ ।
3. ______ येनैन्द्रं अर्धासनमधिष्ठितम् ।
4. तटाकमिव _______तमिन्द्रमिव निर्जराः ।
5. दक्षिणं लोकपालं तं अमन्यन्त ______ ।

## X. कोष्ठात् उचितं पदं चित्वा रिक्तस्थानं पूरयत-

1. नहुषं पदे तस्य न्यवीविशन् ________ (देवाः / असुराः )
2. वीरो रस इव उत्साहात् नहुषात् ______ (नहुषः / ययातिः) अभ्यजायत ।
3. निर्जराः _____पर्युपासत (इन्द्रम् / तटाकम्)
4. दक्षिणं लोकपालं तं अमन्यन्त ______ (दानवाः / दिवौकसः)
5. समानगणनालोख्ये ______ निषद्यते (समानैः / निस्समानैः )

### पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

**कर्तृविस्तारः – वेदान्तदेशिकः**

अस्य वेङ्कटनाथः इति नाम प्रकृतिसिद्धं भवति । एषः स्वस्य एकविंशतितमे वयसि कनकवल्लीं परिणीतवान्। सप्तविंशति तमे वयसि वैष्णवगुरुस्थितिं प्राप्तवान्। ततः स्वगुरोः किडाम्बी अप्पुल्लारः आज्ञया कडलूरू पार्श्वे स्थितं तिरुवहीन्द्रपुरम् गत्वा जीवयामास । एषः तिरुप्पति, मेल्कोट्टै, काञ्चीपुरम्, अयोध्या इत्यादीनि स्थानानि गत्वा जगद्गुरूणां श्रीरामानुजाचार्याणां तत्वानि अप्रचारयत्। अन्ते स्वपुत्रेण कुमारवरददेशिकेन साकं श्रीरङ्गे उषितवान्। एषः 101 वर्षाण्यावत् अजीवयत् ।

अनेन प्रायः विंशत्यधिशतसंख्याकाः ग्रन्थाः विरचिताः । तमिल्भाषा, संस्कृतभाषा, मणिप्रवालम् (उभयमिश्रितम्) इति पद्धत्या ग्रन्थान् रचितवान् । अत्र कतिपयेषां ग्रन्थानां नाम लिख्यते यथा –



Unit 11.indd 77 06-06-2018 12:44:22

| संस्कृतम् | तमिलभाषा | मणिप्रवालम् |
|---|---|---|
| पादुकासहस्रम् | अडैक्कलप्पत्तु | अमृतरञ्जनिरहस्यम् |
| अधिकरणसारावलिः | मुम्मणिक्कोवै | अञ्जलिप्रभावः |
| यादवाभ्युदयम् | नवमणिमालै | गुरुपरम्परासारः |
| हंससन्देशः | चरमश्लोकसुरुक्कु | आराधनकारिका |
| गोदास्तुतिः | पन्निरुणामम् | मुनिवाहनभोगः |
| गोपालविंशतिः | तिरुच्चिन्नमालै | |

तेन विरचितेषु ग्रन्थेषु यादाभ्युदयं तु महाकाव्यं भवति। हंससन्देशः खण्डकाव्यं भवति। एषः सङ्कल्पसूर्योदयम् इति नाटकमपि रचितवान्।

## राजनीतिः -

पर्जन्य इव भूतानां आधारः पृथिवीपतिः।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥
यः कुलाऽभिजनाऽऽचारैः अतिशुद्धः प्रतापवान्।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि॥
यथा सर्वाणि भूतानि धरा धारयते समम्।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥
पाषण्डनैगमश्रेणीं पूगव्रातगणादिषु।
संरक्षेत् समयं राजा दुर्गे जनपदे तथा ॥
अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः।
स संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः ॥
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं हितं प्रजानां तु प्रियं हितम् ॥

## नहुषकथा–

एकदा इन्द्रः त्वष्टुप्रजापतेः अपत्यं हत्वा ब्रह्महत्यादोषात् नष्टप्रभावः स्वपदं त्यक्त्वा किञ्चित्कालं कुत्रचित् लीनः आसीत्। तस्मिन् काले अन्ये देवाः सम्भूय भुवि राज्यं पालयन्तं नहुषं क्रतुशतयाजिनं तत्पदोचितं विचिन्त्य तस्य पदे तम् अभ्यषेचयन् इति महाभारतकथा।

Weblink : 1. swamydesika.tripod.com



Unit 11.indd 78 06-06-2018 12:44:23

# द्वादशः पाठः

12

## Lesson – 12

# विश्वशान्तिः

सुखदुःखात्मके जगति न हि कोऽपि दुःखम् इष्टत्वेन काम्यते। अतः दुःखनिरोधः कथं सम्भाव्यते?। तस्य एक एवोपायः वर्तते – "भुवने शान्तेः सद्धर्मस्य च संस्थापना द्वारा विश्वशान्तिं वर्धयितुं शक्नुमः।



शान्तिस्तु न केवलं एकस्य जनस्य, न च एकस्य कुटुम्बस्य ग्रामस्य एवं नगरस्य। किन्तु सर्वस्यापि जगतः आवश्यकी खलु।

एषा विश्वशान्तिः स्वार्थप्रार्थना , परार्थप्रार्थना इति द्विविधा। आत्मनः शान्त्यर्थं या प्रार्थना क्रियते सा स्वार्थप्रार्थना। जगतः शान्त्यर्थं या प्रार्थना क्रियते सा परार्थप्रार्थना इत्युच्यते।

स्वार्थप्रार्थनायाः अपि परार्थप्रार्थनायाः शक्तिस्तु अधिका भवति। अस्यां प्रार्थनायां हि विश्वप्रेम, विश्वसौहार्दता च भवतः। अत्र वेदेषु विद्यमानान् सुप्रसिद्धान् केचन शान्तिमन्त्रान् उदाह्रियन्ते-

ओम् ।। भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येम अक्षभिर्यजत्राः।
स्थिरैः अङ्गैः तुष्टुवांसः तनूभिः। व्यशेम देवहितं यदायुः।
स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नः तार्क्ष्यो अरिष्ठनेमिः। स्वस्ति नो बृहस्पतिदर्धातु ।।

।। ओं शान्तिः शान्तिः शान्तिः ।।

अस्य मन्त्रस्य तात्पर्यार्थः –"भो ! देवताः, मानवाः वयं सदा मङ्गलां शुभां कल्याणीमेव वाचं शृणुयाम । सर्वदा मङ्गलानि वस्तूनि एव पश्येम। आरोग्यसम्पन्नः सन्तः वयं सर्वदा अपि स्थिरैः इन्द्रियैः देवान् युष्मान् प्रीतिं कुर्मः । भगवता यावदायुः दत्तमस्ति तावदपि सन्तोषेण आनन्देन यापयाम । इन्द्रादयः देवाः सदा अस्मभ्यं मङ्गलं कुर्वन्तु ।

शान्तिमन्त्रेऽस्मिन् सर्वत्र बहुवचनप्रयोग एव दृश्यते। सर्वत्र शृणुयाम, पश्येम, व्यशेम, कुर्मः, नः इति सामूहिकप्रार्थना कृता अस्ति। अनेन विश्वशान्तिः विश्वकल्याणं च भवतः एव ।।

अन्यः सुप्रसिद्धः यजुर्वेदमन्त्रः एवं वदति –

सह नाववतु ।

सह नौ भुनक्तु ।

सह वीर्यं करवावहै ।

तेजस्विनावधीतमस्तु ।

मा विद्विषावहै ।

।। ओं शान्तिः शान्तिः शान्तिः।।

मन्त्रोऽयं लोकप्रियः सुप्रसिद्धश्च । अस्यार्थः – वयं सर्वे सन्तोषेण जीवाम । वयं सहैव सुखदुःखानि अनुभवाम, वयं सहैव राष्ट्रं समर्थं करवाम, वयं क्रियमाणं कर्म संयक् करवाम । वयं परस्परं न कदापि विद्विषामहै । सर्वान् जनान् वयं प्रीणयाम"– इति ।।

एतादृशाः शताधिकाः शान्तिमन्त्राः वेदेषु विश्वशान्तिं विश्वप्रेम च उपदिशन्ति । अतः ईदृशानां शान्तिमन्त्राणां सारभूतानां वेदानां रक्षा अस्माभिः अवश्यं कार्या । एतान् सन्देशान् मनसा अनुसन्दधाम। वेदैः दर्शिते मार्गे सर्वदा सर्वथा च वयं सञ्चराम, विश्वशान्तिं विश्वकल्याणं च सन्ततं अनुभवाम ।।

## अभ्यासः

### I. कठिनशब्दार्थः -

1. विश्वम् – universe
2. वर्धयितुम् – to develop
3. शान्तिः – peace
4. प्रार्थना – prayer
5. आत्मा – soul
6. सौहार्दता – friendship
7. मार्गः – path
8. मङ्गलम् – auspicious



Unit 12.indd 80 06-06-2018 12:45:21

## II. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. वयं कथं विश्वशान्तिं वर्धयितुं शक्नुमः ?
2. शान्तिः कस्य आवश्यकी ?
3. प्रार्थना कति विधा ?
4. स्वार्थप्रार्थना नाम का ?
5. सामूहिकप्रार्थना किमर्थं क्रियते ?
6. वैयक्तिप्रार्थनायां किं भवति ?
7. वयं कीदृशीं वाचं शृणुयाम ?
8. वयं कैः देवान् प्रीतिं कुर्मः ?
9. वयं सर्वदा किं पश्येम?
10. वयं सर्वे कथं जीवेम ?
11. केषां रक्षां अस्माभिः अवश्यं कर्तव्या?

## III. सविस्तरेण उत्तरं कुरुत-

1.“भद्रं कर्णेभिः” इति मन्त्रं लिखित्वा अस्य तात्पर्यं च लिखत।
2. यजुर्वेदोक्तं विश्वशान्तिमन्त्रं विवृणुत।

## IV. घटनाक्रमानुसारं लिखत-

1. मा विद्विषावहै।
2. सह नौ भुनक्तु।
3. तेजस्विनावधीतमस्तु।
4. सह नाववतु।
5. सह वीर्यं करवावहै।



Unit 12.indd 81 06-06-2018 12:45:21

## V. अधो प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत-

सर्वथा, परस्परं, सदा, अपि, इति

1. विश्वशान्तिः स्वार्थप्रार्थना परार्थप्रार्थना _______ द्विविधा।
2. वयं _______ मङ्गलां शुभां कल्याणीमेव वाचं शृणुयाम।
3. वयं सर्वदा _______ स्थिरैः इन्द्रियैः देवान् युष्मान् तुष्टुवांसः।
4. वयं _______ न कदापि विद्विषावहै।
5. वेदैः दर्शिते मार्गे _______ वयं सञ्चराम।

## VI. "आम्" अथवा "न" इति लिखत-

1. जगति न हि कोऽपि दुःखम् इष्टत्वेन काम्यते। _______________
2. शान्तिः केवलम् एकस्य जनस्य आवश्यकी। _______________
3. स्वार्थप्रार्थनायाः अपि परार्थप्रार्थनायाः शक्तिस्तु अधिका भवति। __________
4. वयं सदा मङ्गलां शुभां कल्याणीमेव वाचं न शृणुयाम। _____________
5. शताधिकाः शान्तिमन्त्राः वेदेषु विश्वशान्तिं विश्वप्रेम च उपदिशन्ति। _________

## VII. अधो लिखितानां शब्दानां समानार्थकं कोष्ठात् चित्वा लिखत-

1. जगति ________________ (विश्वे / गिरौ)
2. दुःखम् ________________ (सुखम् / खेदः)
3. जनाः ________________ (प्रजाः / राजा)
4. देवाः ________________ (असुराः / अमराः)
5. राष्ट्रम् ________________ (देशः / वनम्)



Unit 12.indd 82 06-06-2018 12:45:21

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### समानान्तरप्रयोगः

मेधां मे वरुणो ददातु, मेधाग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च, मेधां धाता ददातु मे ।।
वरुणः मह्यम् बुद्धिं ददातु, अग्निः प्रजापतिः अपि मह्यं बुद्धिं ददातु ।
विश्वस्य धारणकर्ता ईश्वरः अपि मह्यम् बुद्धिं ददातु ।।
शं नो मित्रा, शं नो भवत्वर्य्यमा,
शं न इन्द्रो बृहस्पतिः, शं नो विष्णुरुरुक्रमः ।।
यतो यतः समीहसे, ततो नो अभयं कुरु ।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ।।
ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम् ।।
मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा वयं सर्वाणि भूतानि समीक्षामहे ।।
शं नः सूर्य उरुचक्षा उदेतु,
शं नश्चतस्त्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु,
शं नः सिन्धवः शमु सन्त्वापः ।।
।। संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।।

### Weblinks :

1. https://hi.in.wikipedia.org/wiki/विश्वशान्ति
2. https://www.linkedin.com/pulse/विश्वशान्तिः



Unit 12.indd 83 06-06-2018 12:45:21

# व्याकरण–अभ्यासः - 6

## धातुः - आत्मनेपदी - लङ् (Past Tense)

### सेव् – to serve

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | असेवत | असेवेताम् | असेवन्त |
| मध्यमपुरुषः (II Person) | असेवथाः | असेवेथाम् | असेवध्वम् |
| उत्तमपुरुषः (III Person) | असेवे | असेवावहि | असेवामहि |

### यत् – to try

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | अयतत | अयतेताम् | अयतन्त |
| मध्यमपुरुषः (II Person) | अयतथाः | अयतेथाम् | अयतध्वम् |
| उत्तमपुरुषः (III Person) | अयते | अयतावहि | अयतामहि |

### मुद् (मोद्) – to please

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | अमोदत | अमोदेताम् | अमोदन्त |
| मध्यमपुरुषः (II Person) | अमोदथाः | अमोदेथाम् | अमोदध्वम् |
| उत्तमपुरुषः (III Person) | अमोदे | अमोदावहि | अमोदामहि |



Unit 12.indd 84 06-06-2018 12:45:22

# अनुच्छेदलेखनम् - 6

## (Comprehension – 6)

पुरा अशोकः नाम महाराजः भारतवर्षस्य आधिपत्यं अवहत् । सोऽयं चन्द्रगुप्तमौर्यस्य पौत्रः, बिन्दुसारस्य पुत्रः च आसीत् । श्रीरामः इव प्रजानां ऐहिकं आमुष्मिकं च योगक्षेमं व्यचिन्तयत्। प्रथमतः अशोकः तावत् समरप्रियः आसीत् । पश्चात् कलिङ्कसमरस्य विजयेन स्वीयं राज्यम् महत्तरं कर्तुं चिन्तितवान् । सन्नद्धः सहायश्च ततः तथैव चकार ।।



प्रश्नाः -

1. अशोकः कस्य आधिपत्यं अवहत्?
2. चन्द्रगुप्तमौर्यस्य पौत्रः कः?
3. आदौ अशोकः कीदृशः आसीत्?
4. अशोकः किं कर्तुं चिन्तितवान् ?
5. अशोकः कः इव योगक्षेमं व्यचिन्तयत्?

# अनुवादः – 6

## (Translation - 6)

अर्जुनः युद्धे गुरून्, बन्धून्, मित्राणि च अपश्यत्। तान् च दृष्ट्वा तस्य हृदयम् अद्रवत्। दीनः अर्जुनः श्रीकृष्णं करुणम् अभाषत –"अहं कथं गुरून् बन्धून् च बाणैः प्रहरामि? यदि प्रहरामि, तदा हिंसा भवति। यदि न प्रहरामि, धर्महानिः। किम् अहं करोमि? त्वम् एव माम् उपदिश" इति। श्रीकृष्णः अभाषत –"हे पार्थ, त्वं क्षत्रियः असि। अतः त्वम् क्षत्रियाणां धर्मम् अनुसर। प्रजापालनं हि क्षत्रियाणां धर्मः। अतः दुष्टान् निषूदयस्व। साधून् रक्ष। युद्धात् मा पलायस्व। शत्रून् पराजयस्व। राज्यं सुखं च लभस्व। यदि त्वं धर्मेण वर्तसे, तदा लोकः अपि धर्मेण वर्तते" इति।।



Unit 12.indd 85 06-06-2018 12:45:22

# त्रयोदशः पाठः 13

**Lesson – 13**

# विडम्बनकविताः

आधुनिकसंस्कृतकाव्यप्रपञ्चे “कलिविडम्बनम्” इति विख्यातं प्रबोधककाव्यम् (Satire) अनन्यसदृशं स्थानमर्हति । काव्येऽस्मिन् कविः श्रीनीलकण्ठदीक्षितः शताधिकैः सुललितैः श्लोकैः कलौ युगे विविधजनानाम् उपहासास्पदजीवनयुक्तीः सम्यक् वर्णयति । ततः अत्र कतिपयाः श्लोकाः उदाह्रियन्ते



### पण्डितः – Scholar

असम्भ्रमो विलज्जत्वम्
अवज्ञा प्रतिवादिनि ।
हासो राज्ञः स्तवश्चेति
पञ्चैते जयहेतवः ।। 1

### मान्त्रिकः – Advisor

सुखं सुखिषु दुःखञ्च
जीवनं दुःखशालिषु ।
अनुग्रहायते येषां
ते धन्याः खलु मान्त्रिकाः ।। 2

### ज्यौतिषिकः - Astrologer

आयुः प्रश्ने दीर्घमायुः
वाच्यं मौहूर्तिकैः जनैः ।
जीवन्तो बहु मन्यन्ते
मृताः प्रक्ष्यन्ति कं पुनः ।। 3

### भिषक् - Physician

स्वस्थैः असाध्यरोगैश्च
जन्तुभिः नास्ति किञ्चन ।
कातरा दीर्घरोगाश्च
भिषजां भाग्यहेतवः ।। 4



Unit 13.indd 86 06-06-2018 12:46:06

उत्तमर्णः – Creditor

अन्तकोऽपि हि जन्तूनाम्
अन्तकालमपेक्षते ।
न कालनियमः कश्चित्
उत्तमर्णस्य विद्यते ।। 5

धनिकः - An Affluent

स्तोतव्यैः स्तूयते नित्यं
सेवनीयैश्च सेव्यते ।
न बिभेति च जिह्रेति
तथापि धनिको जनः ।। 6

शठः - Wicked

न स्वार्थं किञ्चिदिच्छन्ति
न प्रेर्यन्ते केनचित् ।
परार्थेषु प्रवर्तन्ते
शठाः सन्तश्च तुल्यवत् ।। 7

परच्छिद्रेषु हृदयं
परवार्तासु च श्रवः ।
परमर्मसु वाचं च
खलानाम् असृजत् विधिः ।। 8



**कविपरिचयः** अस्य कवेः श्रीनीलकण्ठदीक्षितस्य जन्म सुप्रसिद्धसंस्कृतविद्वद्वरेण्यस्य श्रीअप्पय्यदीक्षितस्य वंशेऽभूत् । अपि च कविरयं द्रविडदेशे सुप्रसिद्ध "मदुरैनगरस्य तिरुमलै नायक्कर् इति प्रख्यातस्य नृपतेः सभायां मुख्यमन्त्री एवं राष्ट्रकविः च आसीत्। अस्य कालः तु क्रिस्ताब्दीय सप्तदशशतकः (17th cent.A.D) इत्यनुमीयते।।



Unit 13.indd 87 06-06-2018 12:46:06

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. विलज्जत्वम् - shamelessness
2. अवज्ञा - disregard
3. जीवनम् - life
4. कातरः - coward
5. रोगः - disease
6. हृदयम् - heart
7. असंभ्रमः - steadiness
9. धनिकः - rich
11. श्रवः - ear
12. विधिः – lord Brahma

### II. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. अपेक्षते - लट् - आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of ईक्ष् with अप to look
2. सेव्यते - कर्मणि लट् – आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of सेव् to serve
3. मन्यन्ते - लट् – आत्मनेपदी, प्रथमपुरुषः, बहुवचनम् of मन् to think
4. इच्छन्ति - लट् – प्रथमपुरुषः,बहुवचनम् of इच्छ् to like
5. प्रक्ष्यन्ति - लृट् – प्रथमपुरुषः, बहुवचनम् of प्रच्छ् to ask
6. असृजत् - लङ् – प्रथमपुरुषः, एकवचनम् of सृज् to create
7. स्तूयते - कर्मणि लट् - आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of स्तु to pray
8. प्रवर्तन्ते - लट् – आत्मनेपदी, प्रथमपुरुषः बहुवचनम् of वृत् (वर्त्) with प्र to remain meaning engaged in

### III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत-

| | | | | | |
|---|---|---|---|---|---|
| 1. शुचिवेषः + च | = | शुचिवेषश्च | 2. तथा + अपि | = | तथापि |
| 3. अन्तकः + अपि | = | अन्तकोऽपि | 4. पञ्च + एते | = | पञ्चैते |
| 5. किञ्चिदिच्छति | = | किञ्चित् + इच्छति | 6. धन्याः + ते | = | धन्यास्ते |
| 7. नास्ति | = | न + अस्ति | 8. श्वशुरस्तु | = | श्वशुरः+ तु |
| 9. दीर्घमायुः | = | दीर्घम् + आयुः | 10. सन्तश्च | = | सन्तः + च |



Unit 13.indd 88 06-06-2018 12:46:06

IV. अधो लिखितानां पदानां सन्धिम् अथवा सन्धिच्छेदं कुरुत-

1. असम्भ्रमः - ______________________
2. भाग्यहेतवः - ______________________
3. जयहेतवः - ______________________
4. कालनियमः - ______________________
5. परवार्तासु - ______________________
6. दीर्घरोगाः - ______________________
7. असाध्यरोगैः - ______________________
8. परार्थेषु - ______________________
9. परमर्मसु - ______________________
10. विलज्जत्वम् - ______________________

V. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. सभा - समितिः
2. लज्जा - ह्रीः
3. कृपणः - कदर्यः
4. चिकित्सकः - वैद्यः
5. भार्या - पत्नी
6. धनिकः - सम्पन्नः
7. खलः - दुर्जनः
8. रोगः - व्याधिः

VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत

1. अवज्ञा × अनवज्ञा
2. पराजयः × जयः
3. रोगी × स्वस्थः
4. दरिद्रः × धनी
5. सन्तः × दुष्टाः
6. औदार्यम् × कार्पण्यम्
7. स्वार्थः × परार्थः
8. नित्यम् × अनित्यम्



Unit 13.indd 89 06-06-2018 12:46:06

## VII. अधो लिखितानां प्रश्नानाम् उत्तराणि लिखत-

1. कलिविडम्बनं केन विरचितम् ?
2. "पञ्चैव जयहेतवः" – के ते ?
3. कलियुगे कथं भवन्ति ?
4. मौहूर्तिकैः जनैः किं वाच्यम् ?
5. भिषजां भाग्यहेतवः के?
6. अन्तक-उत्तमर्णयोः भेदः कः?
7. "तथापि धनिको जनः" – व्याख्यात।
8. शठानां स्वभावः कीदृशः ?
9. विधिः खलानां हृदयं, श्रवः, वाचं च किमर्थम् असृजत् ?

## IX. सविस्तरम् उत्तरत –

1. टिप्पणीं लिखत-

   (i) ज्यौतिषिकः (ii) पण्डितः

   (iii) धनिकः (iv) उत्तमर्णः

2. व्याख्यात-

   (i) मान्त्रिकः (ii) भिषक् (iii) शठः

## X. कोष्ठात् उचितं पदं चित्वा रिक्तस्थानं पूरयत-

1. बभूव नहुषः तस्मिन् ________ इवाम्बुधौ।
2. यथावत् साधकस्येव, यावदर्था _______ ।
3. ______ येनैन्द्रं अर्धासनमधिष्ठितम् ।
4. तटाकमिव _______तमिन्द्रमिव निर्जराः ।
5. दक्षिणं लोकपालं तम् अमन्यन्त ______ ।



Unit 13.indd 90 06-06-2018 12:46:06

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

कालः अनादिः अखण्डः च । किन्तु अस्माकं व्यवहाराय एव कालभेदः प्रवर्तते । ब्रह्मणा एषा कालगणना प्रारब्धा । कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगश्चेति चत्वारि युगानि ।

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।

द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ।।

श्रीमद्भागवते द्वादशस्कन्धे विभिन्नयुगानां वर्णनं कृतमस्ति। कलियुगवर्णनसन्दर्भे-

वित्तमेव कलौ नृणां जन्माचारगुणोदयः।

धर्मन्यायव्यवस्थायां कारणं बलमेव हि ।।

अनावृष्ट्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः ।

शीतवातातपप्रावृड् हिमैरन्योन्यतः प्रजाः ।।

क्षुत्तृड्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया।

त्रिशंद्विंशति वर्षाणि परमायुः कलौ नृणाम् ।।

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।

कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ।।

### नीलकण्ठदीक्षितस्य अन्याः कृतयः

शिवलीलार्णवः, गङ्गावतरणम्, नीलकण्ठविजयचम्पूः नलचरित्रम्, सभारञ्जनशतकम्, वैराग्यशतकम्, अन्यापदेशशतकम्, आनन्दसागरस्तवः, शिवोत्कर्षमञ्जरी, शान्तिविलासः इत्यादयः।।

### Weblinks :

1. https://nangia.in/kalividambanna.vaidyaah
2. https://sa.in.wikipedia.org/wiki/नीलकण्ठदीक्षितः



Unit 13.indd 91 06-06-2018 12:46:06

चतुर्दशः पाठः 14

Lesson – 14

# वरत्रयम्

उपनिषदः परश्शताः विद्यन्ते। किन्तु ताः सर्वाः अपि न तुल्यमूल्यवन्तः सन्ति। तथापि उपनिषच्छाखासु प्रकृष्टेयं कठोपनिषद्, यतोऽस्यां कथारूपेण आत्मविद्या प्रतिपादिता अस्ति । आत्मविद्या विचारधारेयं वेदकालादारभ्य अभिवृद्धिं प्राप्ता दृश्यते । इयमेव तु उपनिषत्सु पल्लविता कुसुमिता फलिता च दृश्यते। अस्मिन् गद्यभागे कठोपनिषदः कथासारः प्रदर्श्यते ।





एकदा वाजश्रवसो नाम कश्चित् महात्मा सर्वस्वदक्षिणं नाम यज्ञमारभत। न खलु सः मोक्षकामः किन्तु कीर्तिकामः आसीत् । परप्रशंसामात्राभिलाषी सः जीर्णा आसन्नमरणाश्च धेनूः जनेभ्यः दातुमैच्छत्। तस्यासीत् कश्चन पुत्रो नचिकेता नाम। शुद्धाशयः सः यथाश्रुतं यथादृष्टं विश्वसन् पितरमुपगम्य पप्रच्छ-"तात, त्वं मां कस्मै यच्छसि"? इति। तस्य निष्कलङ्कस्य कुमारस्य एवं विधो विचार आसीत्। "पिता यागे सर्वस्वं यच्छति। सर्वस्वदक्षिणस्य यज्ञस्य अयमेव स्वभावः खलु। एवं चेत् पुत्रोऽपि पितुः सर्वस्वे अन्तर्भवति। तस्मात् अहमपि कस्मैचित् दातव्य एव।" एवं चिन्तयन् सः पितरं पृष्टवान्, "तात, मां कस्मै दास्यसि" इति। वक्रबुद्धिः पिता तु पुत्रः स्वमपहसति इत्याशङ्के। नचिकेताः प्रथमं पप्रच्छ। पिता तु मौनी बभूव। पुनरपि अपृच्छत्। पिता तथैव अतिष्ठत्। प्रश्नस्य पुनरावर्तनेन स पिता कुपितो भूत्वा "त्वामहं यमाय यच्छामि" इति पुत्रमवदत् ।।

शुद्धो नचिकेताः तृप्तोऽभवत् । सः पितुर्वचनम् अनुसृत्य यमपुरम् अगच्छत् । तस्मिन्नवसरे यमस्तत्र नासीत्। नचिकेता यमस्यागमनं प्रतीक्षमाणः तिस्रः रात्रीः तत्रैव भक्ष्यपेयरहितः उवास। यदा यमः प्रत्यवर्तत तदा स्वगृहे कञ्चन राजकुमारं अनशनपानं स्थितं ददर्श। धर्मराजः यमः अपराधबोधेन तस्मै त्रीन् वरान् दातुमुद्यतः अभवत्। कुमारस्तु यमस्यौदार्यं स्वीचक्रे।



Unit 14.indd 92 06-06-2018 12:47:01

सः प्रथमेन वरेण इहलोकसौभाग्यसाधुकं पितृप्रसादं प्रार्थितवान् । द्वितीयेन वरेण परलोकसौभाग्यदायकम् अग्निश्च अभ्यर्थितवान् । प्रीतः धर्मराजः वरद्वयम् तस्मै दत्तवान् । अन्ते यदा सः तृतीयेन वरेण अध्यात्मविद्याम् अभ्यर्थयामास, तदा यमः वरममुं नाङ्गीकृतवान् । परन्तु धर्मराजः तस्य अध्यात्मविद्यायां दृढविश्वासम् अभिरुचिं च ज्ञात्वा, सुप्रीतेन मनसा तां विद्यामनुगृहीतवान्। एवं नचिकेताः यमस्यानुग्रहेण अध्यात्मविद्यां प्राप्तवान् ।

## अभ्यासः

### I. कठिनशब्दार्थः-

1. शाखा - branches
2. पल्लवितः - budding
3. कीर्तिकामः – who have desire
4. प्रशंसा – praise
5. सर्वस्वं - entire
6. स्वभावः - nature
7. मौनी – the person who is silent
8. प्रसादः – bliss
9. तृप्तः – the person who is satisfied
10. पेयम् - drinkable
11. अध्यात्मविधा – Study of Philosophy
12. वराः – boons
13. औदार्यम् – generous
14. धर्मराजः – lord Yama
15. प्रतीक्षमाणः – the person who is egarly waiting

### II. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. उपनिषदः कति विद्यन्ते ?
2. कस्यां उपनिषदि कथारूपेण आत्मविद्या प्रतिपादिता अस्ति ?
3. वाजश्रवसः किं यज्ञम् आरभत ?
4. वाजश्रवसस्य पुत्रः कः ?
5. नचिकेताः पितरमुपगम्य किं पप्रच्छ?
6. वाजश्रवसः कीदृशीः धेनूः जनेभ्यः दातुमैच्छत् ?

7. वाजश्रवसः स्वपुत्रं कस्मै दातुम् इष्टवान् ?

8. नचिकेतः पितुर्वचनम् अनुसृत्य कुत्र अगच्छत् ?

9. नचिकेतः कति रात्रीः यमस्य आगमनं प्रतीक्षमाणः उवास ?

10. यमः अपराधबोधेन नचिकेताय किं दातुम् उद्युक्तः अभवत् ?

11. नचिकेतः प्रथमेन वरेण किं प्रार्थितवान् ?

12. नचिकेतस्य द्वितीयः वरः कः?

13. नचिकेतः तृतीयेन वरेण किम् अभ्यर्थयामास?

14. नचिकेतः यमस्यानुग्रहेण किं प्राप्तवान् ?

## III. सविस्तरम् उत्तरं लिखत -

1. वाचश्रवसः नचिकेतयोः सम्भाषणं कथानुसारं लिखत।

2. नचिकेतस्य वरप्राप्तिं यथाग्रन्थं लिखत।

## IV. उचितं क्रियापदं कोष्ठात् चित्वा लिखत-

1. सः जीर्णाः आसन्नमरणांश्च धेनूः जनेभ्यः दातुम् ________(ऐच्छत्, आसीत्)

2. सः यथाश्रुतं यथादृष्टं विश्वसन् पितरम् उपगम्य ________(यच्छसि, पप्रच्छ)

3. पिता यागे सर्वस्वं ________(यच्छति, यच्छसि)

4. सः पितुर्वचनम् अनुसृत्य यमपुरम् ________(अभवत्, अगच्छत् )

5. यमः स्वगृहे कञ्चन राजकुमारं अनशनपानं स्थितं ________(स्वीचक्रे, ददर्श)

## V. आम् अथवा न इति लिखत-

1. नचिकेता सर्वस्वदक्षिणं नाम यज्ञमारभत ________

2. वाजश्रवसः पुत्रः नचिकेताः ________



Unit 14.indd 94 06-06-2018 12:47:01

3. पिता यागे सर्वस्वं यच्छति ________

4. पितुर्वचनम् अनुसृत्य स्वर्गम् अगच्छत् ________

5. धर्मराजः तस्मै त्रीन् वरान् दातुम् उद्यतः अभवत् ________

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

कठोपनिषत् प्रमुखासु दशसु उपनिषत्सु अन्यतमा । कठोपनिषदः काठकोपनिषदित्यपि नाम वर्तते । कृष्णयजुर्वेदीया इयम् उपनिषत्। अस्याम् उपनिषदि अध्यायद्वयं वर्तते । प्रत्येकस्मिन् अपि अध्याये तिस्रः वल्ल्यः विद्यन्ते। यम-नचिकेतसोः संवादरूपेण इयम् उपनिषद् वर्तते ।

### उपनिषदः वैशिष्ट्यम्

प्रत्येकस्मिन् उपनिषदि अपि ब्रह्मज्ञानविषयः एव विवृतः अस्ति चेदपि सर्वस्मिन् अपि नावीन्यं सौन्दर्यञ्च परिदृश्यते । कठोपनिषदः वैशिष्ट्यं नाम अत्र विद्यमाना लघुकथा । कथा सा न वा महत्त्वपूर्णा न वा चित्ताकर्षिका ।

किन्तु अत्र चित्रितः कथानायकः अविस्मरणीयः विद्यते। नायकः बालः नचिकेताः षड्वर्षीयमात्रः। तदीया श्रद्धा, पितृभक्तिः, निर्भयत्वम्, इन्द्रियनिग्रहः, शान्तवृत्तिः, ज्ञानपिपासा, निर्मोहः, सत्यधृतिश्च अपूर्वा एव। ब्रह्मज्ञानम् अपेक्षितवतः नचिकेतसः मनोपरिवर्तनाय यमः सकलैश्वर्यं दातुम् उद्युक्तः जातः। किन्तु तत्सर्वं सम्पूर्णतया निराकृतवान् नचिकेताः। न वित्तेन तर्पणीयो मनुष्यः इत्येतस्याः उक्तेः उदाहरणरूपः जातः । ब्रह्मज्ञानस्य प्राप्तये कीदृशी दृढा त्यागबुद्धिः अपेक्षिता इति दर्शयति ।

### Weblinks :

1. https://sa.in.wikipedia.org/wiki/कठोपनिषत्
2. https://en.in.wikipedia.org/wiki/Nachiketa



Unit 14.indd 95 06-06-2018 12:47:01

## व्याकरण–अभ्यासः - 7

### धातुः – आत्मनेपदी – लृट् (Future Tense)

### सेव् – to serve

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यमपुरुषः (II Person) | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तमपुरुषः (III Person) | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

### यत् – to try

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | यतिष्यते | यतिष्येते | यतिष्यन्ते |
| मध्यमपुरुषः (II Person) | यतिष्यसे | यतिष्येथे | यतिष्यध्वे |
| उत्तमपुरुषः (III Person) | यतिष्ये | यतिष्यावहे | यतिष्यामहे |

### मुद् (मोद्) – to please

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | मोदिष्यते | मोदिष्येते | मोदिष्यन्ते |
| मध्यमपुरुषः (II Person) | मोदिष्यसे | मोदिष्येथे | मोदिष्यध्वे |
| उत्तमपुरुषः (III Person) | मोदिष्ये | मोदिष्यावहे | मोदिष्यामहे |



Unit 14.indd 96 06-06-2018 12:47:01

# अनुच्छेदलेखनम् - 7

(Comprehension – 7)



एकस्मिन् नगरे चण्डो नाम नृपतिः प्रतिवसति स्म । तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालबाहनयोग्यं मेषयूथम् आसीत्। तेषा मेषाणां मध्ये एकः मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति, ते च सूपकाराः यत्किञ्चित् काष्ठं मृण्मयं भाजनं कांस्यताम्रं पात्रं वा पश्यति तेन तम् आशु ताडयन्ति स्म।।

प्रश्नाः-

1. राजपुत्राः प्रासादे कैः सह क्रीडन्ति स्म ?
2. राजपुत्राः वानरयूथं कैः पुष्टिं नयन्ति स्म ?
3. राजगृहे बालवाहनयोग्यं किम् आसीत् ?
4. कः जिह्वालोलुपया महानसं प्रविष्टः?
5. के मेषम् आशु ताडयन्ति स्म ?

# अनुवादः – 7

(Translation - 7)

आसीत् कश्चित् नन्दनामा नृपः। तस्य दश पुत्राः आसन्। तेषु दशमः नन्दस्य एव पुत्रः चन्द्रगुप्तः आसीत्। सः शौर्य, शील, चातुर्यादिगुणैः नवसु भ्रातृषु श्रेष्ठतमः अभवत्। स एकदा देशान्तरात् प्रेषितं पञ्जरस्थं सिंहं दृष्टवा नन्दम् अलिखत् –“तव राज्ये यः पञ्जरभङ्गं विना सिंहं बहिः कर्तुम् समर्थः भवति”? इति । एतच्छ्रुत्वा सर्वे सभासदः मौनी बभूवुः । तदा बालकः चन्द्रगुप्तः –“अहं पञ्जरभङ्गं विना सिंहं निष्कासयामि” इति अवदत्। ततः इन्धनानि आदाय पञ्जरं परितः अरक्षत्। तानि अग्निना प्रज्वलयामास । अग्नेः तापेन सिंह अद्रवत्, पञ्जरात् बहिः अभवत् । एतद्दृष्ट्वा सर्वे तं प्रशंसाम् अकुर्वन्।।



Unit 14.indd 97 06-06-2018 12:47:01

# भाषासेतुः





Unit 14.indd 98 06-06-2018 12:47:01

# संस्कृतपरिचयकरणम्

## अक्षरपरिचयः

वर्णाः (Letters)
எழுத்துக்கள்

स्वराः (अचः)
Vowels
உயிரெழுத்துக்கள்

व्यञ्जनानि (हलः)
Consonants
மெய்யெழுத்துக்கள்

### (i) स्वराः (Vowels)

स्वराः - यस्य वर्णस्य उच्चारणे अपरस्य वर्णस्य सहायता नापेक्षिता, तस्य स्वरः इति नाम। यथा -

अ आ इ ई उ ऊ ऋ ॠ

ऌ ए ऐ ओ औ अं अः

स्वराः

ह्रस्वः (Short)
குறில்

दीर्घः (Long)
நெடில்

### ह्रस्वस्वराः (Short Vowels)

अ इ उ ऋ ऌ

### दीर्घस्वराः (Long Vowels)

आ ई ऊ ॠ ए ऐ ओ औ

### (ii) हलः (व्यञ्जनानि) Consonants

व्यञ्जनानि – यस्य वर्णस्य उच्चारणे स्वरवर्णस्य सहायता अपेक्षिता तस्य हलः इति नाम।



Unit 14.indd 99 06-06-2018 12:47:01

| | | | | | | |
|---|---|---|---|---|---|---|
| कवर्गः | - | क | ख | ग | घ | ङ |
| चवर्गः | - | च | छ | ज | झ | ञ |
| टवर्गः | - | ट | ठ | ड | ढ | ण |
| तवर्गः | - | त | थ | द | ध | न |
| पवर्गः | - | प | फ | ब | भ | म |
| अन्तस्थाः | - | य | र | ल | व | |
| ऊष्माणः | - | श | ष | स | ह | |

### (iii) स्वरयुक्तव्यञ्जनाक्षराणि (Compound letters)

| | | |
|---|---|---|
| क् + अ = क | क् + आ = का | क् + इ = कि |
| क् + ई = की | क् + उ = कु | क् + ऊ = कू |
| क् + ऋ = कृ | क् + ॠ = कॄ | क् + ऌ = कॢ |
| क् + ए = के | क् + ऐ = कै | क् + ओ = को |
| क् + औ = कौ | क् + अं = कं | क् + अः = कः |

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| क | का | कि | की | कु | कू | कृ | कॄ | कॢ | के | कै | को | कौ | कं | कः |
| ख | खा | खि | खी | खु | कू | कृ | खॄ | खॢ | खे | खै | खो | खौ | खं | खः |
| ग | गा | गि | गी | गु | गू | गृ | गॄ | गॢ | गे | गै | गो | गौ | गं | गः |
| घ | घा | घि | घी | घु | घू | घृ | घॄ | घॢ | घे | घै | घो | घौ | घं | घः |
| ङ | ङा | ङि | ङी | ङु | ङू | ङृ | ङॄ | ङॢ | ङे | ङै | ङो | ङौ | ङं | ङः |
| च | चा | चि | ची | चु | चू | चृ | चॄ | चॢ | चे | चै | चो | चौ | चं | चः |
| छ | छा | छि | छी | छु | छू | छृ | छॄ | छॢ | छे | छै | छो | छौ | छं | छः |
| ज | जा | जि | जी | जु | जू | जृ | जॄ | जॢ | जे | जै | जो | जौ | जं | जः |



Unit 14.indd 100 06-06-2018 12:47:01

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| झ | झा | झि | झी | झु | झू | झृ | झॄ | झॢ | झे | झै | झो | झौ | झं | झः |
| ञ | ञा | ञि | ञी | ञु | ञू | ञृ | ञॄ | ञॢ | ञे | ञै | ञो | ञौ | ञं | ञः |
| ट | टा | टि | टी | टु | टू | टृ | टॄ | टॢ | टे | टै | टो | टौ | टं | टः |
| ठ | ठा | ठि | ठी | ठु | ठू | ठृ | ठॄ | ठॢ | ठे | ठै | ठो | ठौ | ठं | ठः |
| ड | डा | डि | डी | डु | डे | डृ | डॄ | डॢ | डे | डै | डो | डौ | डं | डः |
| ढ | ढा | ढि | ढी | ढु | ढे | ढृ | ढॄ | ढॢ | ढे | ढै | ढो | ढौ | ढं | ढः |
| ण | णा | णि | णी | णु | णू | णृ | णॄ | णॢ | णे | णै | णो | णौ | णं | णः |
| त | ता | ति | ती | तु | तू | तृ | तॄ | तॢ | ते | तै | तो | तौ | तं | तः |
| थ | था | थि | थी | थु | थु | थृ | थॄ | थॢ | थे | थै | थो | थौ | थं | थः |
| द | दा | दि | दी | दु | दू | दृ | दॄ | दॢ | दे | दै | दो | दौ | दं | दः |
| ध | धा | धि | धी | धु | धू | धृ | धॄ | धॢ | धे | धै | धो | धौ | धं | धः |
| न | ना | नि | नी | नु | नू | नृ | नॄ | नॢ | ने | नै | नो | नौ | नं | नः |
| प | पा | पि | पी | पु | पू | पृ | पॄ | पॢ | पे | पै | पो | पौ | पं | पः |
| फ | फा | फि | फी | फु | फू | फृ | फॄ | फॢ | फे | फै | फो | फौ | फं | फः |
| ब | बा | बि | बी | बु | बू | बृ | बॄ | बॢ | बे | बै | बो | बो | बं | बः |
| भ | भा | भि | भी | भु | भू | भृ | भॄ | भॢ | भे | भै | भो | भौ | भं | भः |
| म | मा | मि | मी | मु | मू | मृ | मॄ | मॢ | मे | मै | मो | मौ | मं | मः |
| य | या | यि | यी | यु | यू | यृ | - | यॢ | ये | यै | यो | यौ | यं | यः |
| र | रा | रि | री | रु | रू | - | - | - | रे | रै | रो | रौ | रं | रः |
| ल | ला | लि | ली | लु | लू | लृ | - | लॢ | ले | लै | लो | लौ | लं | लः |
| व | वा | वि | वी | वु | वू | वृ | वॄ | वॢ | वे | वै | वो | वौ | वं | वः |
| श | शा | शि | शी | शु | शू | शृ | शॄ | शॢ | शे | शै | शो | शौ | शं | शः |
| ष | षा | षि | षी | षु | षू | षृ | षॄ | षॢ | षे | षै | षो | षौ | षं | षः |
| स | सा | सि | सी | सु | सू | सृ | सॄ | सॢ | से | सै | सो | सौ | सं | सः |
| ह | हा | हि | ही | हु | हू | हृ | हॄ | हॢ | हे | है | हो | हौ | हं | हः |



Unit 14.indd 101 06-06-2018 12:47:01

## (iv) संयुक्ताक्षराणि
## Conjunct Consonants

**क्**

क् + क= क्क<br>
क् + त= क्त<br>
क् + य= क्य<br>
क् + र= क्र<br>
क् + ष= क्ष<br>
क् + व= क्व

**ख्**

ख्+ य= ख्य

**ग्**

ग्+ म= ग्म<br>
ग्+ न= ग्न<br>
ग्+ र = ग्र

**घ्**

घ्+ म= घ्म<br>
घ्+ न= घ्न<br>
घ् + य= घ्य<br>
घ् + र= घ्र

**च्**

च्+ च= च्च<br>
च्+ छ= च्छ<br>
च्+ न= च्न<br>
च्+ म= च्म<br>
च्+ र= च्र

**ज्**

ज्+ ज= ज्ज<br>
ज्+ न= ज्न<br>
ज्+ म= ज्म<br>
ज्+ य = ज्य<br>
ज्+ र = ज्र<br>
ज् + ञ= ज्ञ

**ट्**

ट्+ ट= ट्ट<br>
ट्+ य = ट्य<br>
ट्+ र= ट्र

**ठ्**

ठ्+ य = ठ्य

**ड्**

ड्+ ड= ड्ड<br>
ड्+ य = ड्य<br>
ड्+ र= ड्र

**ण्**

ण्+ क= ण्क<br>
ण्+ ड= ण्ड<br>
ण्+ ण= ण्ण

**त्**

त्+ क= त्क<br>
त्+ त= त्त<br>
त्+ म= त्म<br>
त्+ न= त्न<br>
त्+ र= त्र<br>
त्+ य = त्य<br>
त्+ व= त्व

**थ्**

थ्+ य = थ्य<br>
थ्+ व= थ्व<br>
थ्+ र= थ्र

**द्**

द्+ ग= द्ग<br>
द्+ द= द्द<br>
द्+ व= द्व<br>
द् + ध= द्ध<br>
द्+ र= द्र<br>
द् + म= द्म<br>
द्+ य= द्य

**ध्**

ध्+ न= ध्न<br>
ध्+ म= ध्म<br>
ध्+ य= ध्य<br>
ध्+ र= ध्र<br>
ध्+ व= ध्व

**न्**

न्+ क= न्क<br>
न्+ त= न्त<br>
न्+ द= न्द<br>
न्+ न= न्न<br>
न्+ म= न्म<br>
न्+ व= न्व

**प्**

प्+ त= प्त



Unit 14.indd 102 06-06-2018 12:47:01

प्+ न= प्न

प्+ म= प्म

प्+ य= प्य

प्+ र= प्र

फ्

फ् + ल= फ्ल

ब्

ब्+ ज= ब्ज

ब्+ द= ब्द

ब्+ ध= ब्ध

ब्+ व= ब्व

ब्+ र= ब्र

भ्

भ्+ न= भ्न

भ्+ य= भ्य

भ्+ व= भ्व

भ्+ र= भ्र

म्

म्+ न= म्न

म्+ म= म्म

म्+ य= म्य

म्+ ल= म्ल

म्+ र= म्र

य्

य्+ य= य्य

य्+ व= य्व

र्

र्+ क= र्क

र्+ त= र्त

र्+ न= र्न

र्+ म= र्म

र्+ य= र्य

ल्

ल्+ क= ल्क

ल्+ त= ल्त

ल्+ न= ल्न

ल्+ प= ल्प

ल्+ ल= ल्ल

व्

व्+ न= व्न

व्+ य= व्य

व्+ र= व्र

श्

श्+ च= श्च

श्+ छ= श्छ

श्+ न= श्न

श्+ व= श्व

श्+ र= श्र

ष्

ष्+ क= ष्क

ष्+ ट= ष्ट

ष्+ ण= ष्ण

ष्+ म= ष्म

ष्+ र= ष्र

स्

स्+ क= स्क

स् + त= स्त

स्+ थ = स्थ

स् + म= स्म

स्+ र= स्र

ह्

ह्+ व= ह्व

ह् + ण= ह्ण

ह्+ न = ह्न

ह् + म= ह्म

ह् + य = ह्य

ह् + र= ह्र



Unit 14.indd 103 06-06-2018 12:47:01

# लिङ्गज्ञानम्

## (i) पुल्लिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. बालकः | 2. अजः | 3. गजः | 4. अश्वः | 5. रथः |
| 6. हस्तः | 7. नरः | 8. वानरः | 9. छात्रः | 10. अध्यापकः |
| 11.वृक्षः | 12. बकः | 13. कन्दुकः | 14. सूर्यः | 15. मकरः |
| 16. शशकः | 17. हंसः | 18. काकः | 19. मेघः | 20.मीनः |
| 21. मयूरः | 22. मृगः | 23. सिंहः | 24.पर्वतः | 25. चन्द्रः |
| 26. कृषकः | 27. पिकः | 28. सर्पः | 29. शुकः | 30. गर्दभः |

## (ii) स्त्रीलिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. बालिका | 2. लता | 3. पेटिका | 4. शिबिका | 5. माला |
| 6. छात्रा | 7. अध्यापिका | 8. सेविका | 9. महिला | 10. मक्षिका |
| 11. कलिका | 12. वाटिका | 13. शाखा | 14. घटिका | 15. नौका |
| 16. वर्तिका | 17. पताका | 18. चटका | 19. शाटिका | 20. सरिता |
| 21. पाठशाला | 22. पत्रिका | 23. वेला | 24. वेदिका | 25. कन्या |
| 26. प्रतिमा | 27. कुल्या | 28. मासिका | 29. जिह्वा | 30. पादुका |

## (iii) नपुंसकलिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. फलम् | 2. पत्रम् | 3. गृहम् | 4. पुष्पम् | 5. कमलम् |
| 6. शाकम् | 7. नेत्रम् | 8. मुखम् | 9. धनम् | 10. जलम् |
| 11. चित्रम् | 12. वनम् | 13. विमानम् | 14. दुग्धम् | 15. भवनम् |
| 16. उद्यानम् | 17. नक्षत्रम् | 18. नगरम् | 19. पुस्तकम् | 20. छत्रम् |
| 21. बीजम् | 22. यन्त्रम् | 23. ओदनम् | 24. वस्त्रम् | 25. मोदकम् |
| 26. सोपानम् | 27. पात्रम् | 28. ज्ञानम् | 29. शरीरम् | 30. उपनेत्रम् |



Unit 14.indd 104 06-06-2018 12:47:01

## वचनविभागः

### (i) पुल्लिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | बालकः | बालकौ | बालकाः |
| 2. | अजः | अजौ | अजाः |
| 3. | गजः | गजौ | गजाः |
| 4. | रथः | रथौ | रथाः |
| 5. | वृक्षः | वृक्षौ | वृक्षाः |
| 6. | वानरः | वानरौ | वानराः |
| 7. | अश्वः | अश्वौ | अश्वाः |
| 8. | मयूरः | मयूरौ | मयूराः |
| 9. | शुकः | शुकौ | शुकाः |
| 10. | सिंहः | सिंहौ | सिंहाः |

### (ii) स्त्रीलिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | बालिका | बालिके | बालिकाः |
| 2. | लता | लते | लताः |
| 3. | माला | माले | मालाः |
| 4. | पेटिका | पेटिके | पेटिकाः |
| 5. | महिला | महिले | महिलाः |
| 6. | पताका | पताके | पताकाः |
| 7. | शाखा | शाखे | शाखाः |
| 8. | पाठशाला | पाठशाले | पाठशालाः |
| 9. | नौका | नौके | नौकाः |
| 10. | मक्षिका | मक्षिके | मक्षिकाः |



Unit 14.indd 105 06-06-2018 12:47:01

## (iii) नपुंसकलिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | फलम् | फले | फलानि |
| 2. | पत्रम् | पत्रे | पत्राणि |
| 3. | कमलम् | कमले | कमलानि |
| 4. | नेत्रम् | नेत्रे | नेत्राणि |
| 5. | धनम् | धने | धनानि |
| 6. | वनम् | वने | वनानि |
| 7. | विमानम् | विमाने | विमानानि |
| 8. | गृहम् | गृहे | गृहाणि |
| 9. | मोदकम् | मोदके | मोदकानि |
| 10. | पुस्तकम् | पुस्तके | पुस्तकानि |



Unit 14.indd 106 06-06-2018 12:47:01

# संस्कृतमनोहरी - Class XI
# List of Authors and Reviewers


### Chair Person

Dr. **R. Thiagarajan,** M.A., Ph.D.,
Former Prof. of P.G. & Research Dept. of Sanskrit,
Presidency College, Chennai.

### Reviewer

Dr. **V. Mohan,** M.A., Ph.D.,
Asst. Director, CPR Institute of Indological
Research Centre, Alwarpet, Chennai.

### Authors

**K. Maheswari,** Siromani, Sikshasastri,
PG Asst. in Sanskrit,
Sri Ahobila Math OHSS, Chennai.

**R. Sridhar**, Siromani, M.A., B. Ed.,
The Principal (Aca.), Bharati Vidya Bhavan MHSS, Erode.

**K.S. Kannan**, M.A., M.Phil., B.Ed.,
PG Asst. in Sanskrit,
The Gopalapuram Boys Hr.Sec.School, Chennai.

Dr. **K. Mallikeshwaran**, M.A., B.Ed., Ph.D.,
PG Asst. in Sanskrit, DAV MHSS, Mugappair, Chennai.

**K. Narayanan**, M.A., B.Ed.,
PG Asst. in Sanskrit, GK Shetty MHSS,
Adambakkam, Chennai.

**T. Lalitha Subbulakshmi**, M.A., B.Ed.,
PG Asst. in Sanskrit, Anna Adarsh MHSS,
Anna Nagar, Chennai.

Dr. **V.V. Rajeswari**, M.A., M.Ed., Ph.D.,
PG Asst. in Sanskrit, Sri Ahobila Math OHSS, Chennai.

**S. Muthukumaraswamy**, Siromani, M.A., M.Phil., B.Ed.,
Sanskrit Pandit, Sri Ahobila Math OHSS, Chennai.

**B.S. Srikanth**, Siromani, M.A., B.Ed.,
PG Asst. in Sanskrit, Sri Sivaswamy Kalalaya HSS,
Mandaveli, Chennai.

**V. Sriram**, Siromani, M.A., M.Phil., B.Ed.,
Sanskrit Pandit, Sri Ahobila Math OHSS, Chennai.

### Text Book Writing

**Indological Research Institute**, CPR Foundation,
Alwarpet, Chennai.

### Co-ordinator

**K.Chandrasekaran**
Lecturer, DIET, Chennai.

## Art and Design Team

### Chief Co-ordinator and Creative Head
**Srinivasan Natarajan**

Layout
**Thy designer**

QC
**Gopu Rasuvel**
**Ragupathy**

Wrapper Design
**Kathir Arumugam**

Co-ordination
**Ramesh Munisamy**

Typist
**Shanthi**



This book has been printed on 80 G.S.M.
Elegant Maplitho paper.

Printed by offset at: